धीयते धनमस्येतिपुरुषंपुरानिघ्नंतिदस्यवः क्लिश्यंतिविविधैर्दंडैर्नित्यमुद्वेजयंतिच मंदलोलुपतादुःख
मितिबुद्धंचिरान्मया यद्यदालंबतेकामस्तत्तदेवानुरुध्यसे अतःतत्त्वोसिबालस्त्वंदुस्तोषोपूरणोनलः नैवत्वं ५९
वेत्यसुलभंनैवत्वंवेत्थदुर्लभं पातालमिवदुष्पूरोमांदुःखैर्योक्तुमिच्छसि नाहमद्यसमावेष्टुंशक्यःकामपु

नलब्ध्वा निर्वेदमर्हमाप्साद्यद्रव्यनाशाद्यदृच्छया निवृत्तिंपरमांप्राप्यनाद्यकामान्विचिंतये अतिक्लेशा
न्मारीहंनाहंवुद्ध्याप्यवुद्धिमान् निकृतोधननाशेनमायेसर्वाङ्गविज्वरः परित्यज्यामिकामत्वांहित्वा
सर्वमनोगतीः नत्वंमयापुनःकामनह्यंस्यसेविरंस्यसे क्षमिष्येऽक्षरमाणानांनहिंसिष्येचहिंसितः ।
द्वेष्यमुक्तःप्रियंवद्याम्नाप्यत्यतद्ाप्रियं तृप्तःस्वस्थेंद्रियोनित्यंयथालब्धेनवर्तयन् नसकामंकरि
ष्यामिकामत्वांशत्रुमात्मनः निर्वेदंनिवृत्तिंतृप्तिंशान्तिंसत्यंदमंक्षमाम् सर्वभूतदयांचैवविद्धिमांशरण
गतं तस्मात्कामश्चलोभश्चतृष्णाकार्पण्यमेवच त्यजंतुमांप्रतिष्ठंतंसत्त्वस्थोह्यस्मिसांप्रतं विहायकामं
क्रोधंचलोभंपारुष्यमेवच नाद्यलोभवशंप्राप्तोदुःखंप्राप्स्यसिनात्मवान् यद्यत्त्यजतिकामानांतत्सु
खस्याभिपूर्यते कामस्यवशगोनित्यंदुःखमेवप्रपद्यते कामान्युदंस्यधुनतेयत्किंचित्पुरुषोरजः का
मक्रोधाज्जंवेदुःखमह्रीररतिरेवच एषब्रह्मप्रविष्टोहंग्रीष्मेशीतमिवह्रदं शाम्याम्यपरिनिर्वामिसु
खमास्तेचकेवलं यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींक

२.हा. लां आत्मनावुद्ध्यासंकामंहित्वाप्राज्ञमिवोत्तमम् प्राप्यवन्धंब्रह्मपुरीराजसंचाप्महेसुखी एतांतु
५० द्धिंसमास्थायमंकिर्निर्वेदमागतः सर्वान्कामान्परित्यज्यप्राप्यब्रह्ममहत्सुखं दम्पनाशक्कृतेमं
किरमरत्वंविलागमत् छित्वाकामममूलंचतेनप्राप्यमहत्सुखं यद्इदंमंकिनागीतंपठेद्या
ख्यानमुत्तमं विमुक्तःसर्वपापेभ्योवैकुंठभुवनंव्रजेत् इतिहासस्मुच्चयेमंकिगीतानामषो
डशोध्यायः १६ युधिष्ठिरउवाच ॥ म वैराग्येवतां मानां कोनुलाभः परः स्मृतः ॥ तत्कर्मेकं स शं कु
केवापमेनन्मानंमम भीष्मउवाच तात ध्याव वृत्त्महत्त ॥१॥ भीष्म उवाच ॥
प्रज्ञावान्सुरवमाप्नोतिप्रज्ञांपिहपरत्रच २ प्रज्ञयानिवृत्तिप्राप्नोवत्तरैश्वर्यसंतपात् प्रज्ञादानम
विमंकीतस्मात्किंविद्यतेपरं ३ अत्रैवोदाहरंतीममितिहासंपुरातनं इंद्रकश्यपसंवादंतं
न्नि बोधयुधिष्ठिर ४ वैश्यः कश्चित्प्रपणान्गोतंकश्यपनामसंशितंद्विजं रथेनपातयामासश्री
मदनैश्वर्यमदान्वितः विनिश्वसत्सदरवाल्लोनिर्वेदादिदमब्रवीत् मरिष्याम्यधनस्येहवो ५०

हेते

त्वयोपजीवितेनमे ॥६॥ तंमर्त्यमेवकुलंविकुलंदीनमानसं इंद्रःशृगालरूपेणइमेत्यब्रवीत्वचोऽधमत ७
शृगालउवाच ॥ कच्चित्स्वमपितेद्वेनोनानकूलंहितंप्रति परेणप्रतिकूलेनकिंसर्पप्रतिनप्यसे ॥८॥
आत्मनःप्रतिकूलानिमनसायद्विनेच्छसि परेषांप्रतिकूलानिवर्जयततोमनः ॥९॥ यत्कृतेहिदु
यथेनध्रुवंतदिहसोष्ट्रने नदुःखस्वकृतेनप्राप्यपीडासंतापरेणकिं ॥१०॥ पीडमानोनरशंदुःखैः
देषाकिंमनुशोचति सर्वदुःखावधंधर्म ॥ मूढंत्वंचकरोषिकिं धर्मकर्तुमशाक्तायेनेशोचंतीहमद्विधः त्वंतुधर्मक्रिया
शक्तोविप्रत्वंकिंनुशोचसि मानुष्यंप्राप्यनेवस्तनपुण्यैर्बहुविधैरिह मानुष्यःत्वेचाविप्रत्वंननतःश्रोत्रिय
तानथा सत्त्वानुत्तमंलब्ध्वाश्रोत्रियत्वंसुदुर्लभम् कथंत्वंनिर्धनोस्मितिनिर्वेदंगंतुमिच्छसि ग्रहोपर
श्रयिनकस्यमहिमानोपजायते उपर्युपरिपश्यंतस्सर्वएवदरिद्रति प्रार्थयंतिधनेविप्रपुरुषाविषयात्म
कः धनंचविषयंचैवअन्यजंतिकनिशुद्वयः हद्भिर्विगर्हितान्तीवदुःखदाश्रीधनस्पृहा तंतुष्टोयः।

धा३

तनेच पुरुषं द्विः पूर्णसमस्तां मुवमेवच गोमिश्रीवत्तयाश्चे
कोश्या र प्रनष्टनीतप्युतिच वित पश्यपिवास्घिनेभि

२.६१ स्याकर्मस्यस्योत्संतंदिविमोरते धनंहिपुरुषोवसन्पुरुषोधनमेववा ग्रवश्यमेकंत्यजतितस्मात्किं धनत्सया
५१ स्पृहयेतिहि संतुष्टाधनिनोवधनस्यच संतोषाद्वयेवं...किंधनैर्धनदेनवा धनेह्यात्यज्ञसंगानोयत्सुखेश्वोत
चेतसो कुतस्तद्धनलुब्धानामितश्चेतश्चधावतां अपिचसमं द्वौमू मिमिमांलभतेसगवां नैसतेनधनेनघा ८
नेषीतप्युतिकि नसुखं धनलामे ममनिन्मसोममपुत्रो... भवत्पर्हो विना
धर्मोनार्थोधर्मविनाभवेत् तस्माद्धर्मपराधीनःस्पृहामर्थेपरित्यजेत् अर्थे सूमहान् त्वनर्थस्तोय याधिकं
संजातेष्वपिचार्थेषु विप्रायेगोमहत्तरं अर्थोपार्जनशक्तोहिन श्रेयोविंदतेनरः अस्मास्थीगमाः सर्वमानो
मोहविवर्जिताः रजतःसलिलादग्नेश्चोरतःस्वजनादपि भयमर्थवतांनित्यंमृत्योःप्राणभृतामिव यथायामि
मिषमाकाशेपक्षिभिःश्वापदैर्भुवि भक्ष्यतेसलिलेमत्स्यैस्तथासर्वत्रवित्तवान् दरिद्रःप्रार्थयत्यर्थमर्थ
वान्राज्यमिच्छति राजाचपृथिवीशत्वंस चक्रवर्तितां चक्रवर्त्यपिचेंद्रत्वमिंद्रोपिब्रह्मणःपदं
तस्मादपिपुनस्तस्मादपिपुनःपुनः एवंनानाहितृष्णायाःयतःसर्वोत्तिकश्चनतस्मादुरंतांतृष्णांरोधन ५१
तस्मा

(left margin, rotated:) तस्माद्धनमुत्सृज्य... / सोमपुत्र... / ...

तस्मात्विमांत्यज सुमहद्विश्वपिशाचैस्तस्मान्नार्थैः प्रशाम्यति सं प्रज्वलति सा भूयः सर्पिर्भिरिव पावकः स्वप्नल
ब्धाय यथा लाभाः क्षणमेव वहस्वावहाः न हृदे वद्विजश्रेष्ठनराणामर्थसम्पदः संपदो निलक्लोलां वुत्तरंगक्षणभं
गुराः कर्सशस्वाशीविषावासन्तरुच्छायास्विव सुप्येत् कार्यएप मत्सरो दंभैः क्रोधस्तस्मा भयं मदः अर्थजानि
विदुः प्राज्ञा दुःखान्येतानि देहिनां नरेवंवहुदोषस्य निः तस्य मनीषिभिः अर्थस्यार्थीकार्यं नाम प्राणांस्त्यक्तुं ८
मिहेच्छसि आत्मप्राणपरित्यागं विगर्हन्ति विपश्चितः अयं न जातेः पापस्य किमु न ब्रह्मवादिनः अज्ञाननिद्रया
सुप्तः सुखदुःखप्रबोधया चिरं प्राप्तोसि दुर्बुद्धे प्रतिबुध्यस्व सांप्रतं ब्राह्मण्यं प्राप्यते ब्रह्मंस्तपोभिर्बहुभिर्भुवि ।
तल्लब्ध्वा यदि संसारं नापक्रमेत्त्वं चितः अहो कृतार्थता तेषां सन्तीह प्राणयः पाणि भद्रैः स्पृहास्माकं यता ये यां
यमवर्तेयथा अपाणित्वाद्द्वयं ब्रह्मन् कं कान्नोद्धरामहे जंतून् दंशकान् देहे न निवर्धुं हि ते शक्ताः तथापि ।
नात्मनः प्राणांस्त्यक्तुमिच्छाम्यहं द्विज अस्मकं साप्यपरां योनिं पतिष्यामपरामिति दृश्यं सहस्रगालं त्वं न कु
मीत्नचमूषकाः नशयीनचमंडूकान्नचान्याः त्या पयोनिः दृष्टान्यबधिरत्वं गात्रेरोगिन्मूकजडांस्तथा
८२
त्दूषतो

५ ६७ नलम्पनेरे

हीनांगोऽप्यपरोक्षमहाधन्योऽस्तिकाश्यप तदन्येनैव लाभेन हृष्टुमर्हसि किंपुनर्योगिसत्त्वानां सर्वेषां
५२ मनुष्याणां द्विजः श्रुतौ चेयद्दिष्टं ब्रह्मन्भाषितं श्रद्धयाश्रियत ततोयतस्व धर्मायनात्मानं त्यक्तुमर्हसि धर्मम
चरतोवृत्तिंयदिनोपगमिष्यति ननामकेऽपिशीर्षोऽप्यनुश्रावकान्यपिचेमन्स्याति देवतस्त्वलहत्र्यापि धर्मो ६७
यस्सनसीदति आदायएवसमंतव्योधर्मंवृत्त्वाहिसाधवः स्वाध्यायमग्निसंस्कारंब्रह्मचर्यंदमस्तपः अ
स्तेयमनसूयंचदत्तमांश्चैवानुपालय असत्यवचनंहिंसामसंतोषमनार्जवं नास्तिक्यंमानमीर्ष्यांचवि
षयांश्चपरित्यज विषयासक्तचित्तानांधनेवहुमनेन्द्रणां निवृत्तविषयेच्छानांकिंधनेनमनीषिणां अ
शत्यक्तुंनशक्नोतिविषयान्विषयात्मक त्यजन्तेषुततःसंगोमान्धातामरिकोवरः नहिखल्वप्यसंगस्य
कामःक्वाचनजायते दर्शनात्स्पर्शनाद्घ्राणाच्छ्रवणाच्चसंजायते नाचंस्मरतिकारणापाच्च रागानांचयतिणं स्वद्वौ
ताभ्यांचाभ्योदिकंभोगेनकिंचिदिहविद्यते यानिचान्यानिदूरेषुभक्ष्यभोज्यानिकानिचित् तेषामभुक्ता
सर्वेत्वानित्यमस्मृतिरेवते अदर्शनमनाघ्राणमस्पर्शश्रवणंतथा पुरुषोनियमैरेतैःश्रेयःप्राप्नोत्य ५२

नुत्तमे शब्दरूपरसस्पर्शगन्धादिभ्योयथाविधि हमतिमेतिपुरुषाश्शांतिमेतितयातथा यतोयतोनिव
र्तेततस्ततोविमुच्यते निवर्तनाद्धिसर्वत्रनवेत्तिदुःखमेववा तस्मात्त्वंविषयांस्त्यक्त्वाविषदग्धान्सुदुस्त्यजा
न् हृदिकृत्तेंद्रियग्रामंपाशांतानीवपंजिरे इंद्रियैर्नियतैर्मोहाज्ञानाभिस्विनश्यते लोकेवितनमात्मानं
ति लोकंचात्मनिपश्यति इंद्रियाणिसमस्तानिषष्ठंमनसाहृदि मनोबुद्धौसमाधत्स्वबुद्धिंचपरमात्मनि।
एवंबुद्धिंसमाधायपरेब्रह्मणिनिर्मलं क्षिप्रंयास्यसिनिर्वाणंनिरेन्धनइवानलः ग्रथवैतन्नशक्नोषिपर
न मात्मनमच्युतं हृदिसाकारसाधन्स्वयथारुचितमात्मनः नारायणंजगद्योनिंसर्वलोकमहेश्वरं येचिं
तयंतिमनसानतेषांविद्यतेभयं भीष्मउवाच श्रुत्वैतत्सद्विजःसर्वंशृगालंप्राहविस्मितः विष्णुर्महेंद्रो
रुद्रोवाब्रूहिकस्त्वंमहामते शृगालउवाच इंद्रोहिमिहसंप्राप्तस्तवानुग्रहकाम्यया त्यक्त्वालोभं
त्वमुत्तिष्ठचरधर्ममनुत्तमं भीष्मउवाच एवंसमनुशास्येंद्रस्तेद्विजंत्रिदिवंगतः कश्यपोपिययौक्षेत्रं
जं

धीरः किंचिन्नातः कुर्यात्सुखमाप्नोतीति प्रसादपुरः प्रतीयते मानवानां पितस्तताचक्ष्व मम यशीघ्रं धर्मपरं धर्मम् आचरेयं ॥ पितोवाच । अधीत्य वेदान्ब्रह्मचर्यपुरस्सरान् उपपद्यन्ते तोदारान्प्रजार्थं वै समाहितः अग्नीनाधाय विधिवदिष्ट्वा यज्ञैः सुदक्षिणैः वनं प्रविश्य विधिवत्ततः कामं समुत्सृ

इ॰ह॰ ह्यत्वा मुक्तिमवाप्नुयात् तस्मात्सर्वलाभानां प्रज्ञालाभः परः स्मृतः प्रज्ञावान्सुखमाप्नोति पुमानिह परत्र च जेतः १५

५३ प्रज्ञामूलमिदं सर्वं दृष्टादृष्टविचेष्टितम् तस्मादुभयसिद्ध्यर्थं कुर्यात्प्रज्ञां विशेषतः सनातनं गुणरहितो

निरंजनं जनार्दनं त्रिभुवनकर्मसाक्षिणम् नमामि तेन स्ववरलोकनायकं पुनर्भवव्यसनभयापहं स

दा परामवव्यथितमहार्यनिश्चय प्रबोधितं पथि पतितं द्विजोत्तमं स्वशृगालतामुपगतवान्सुरेन्द्रो महा

त्मनां भवति महाननुग्रहः इतिहाससमुच्चये इंद्रकश्यपसंवादो नाम सप्तदशोध्यायः १७ युधिष्ठि

पं॰ ६ र उवाच अतिक्रामति कालेऽस्मिन्सर्वलोकभयावहे किं कर्तव्यं श्रेयस्तन्मे ब्रूहि पितामह भीष्म उवाच ॥

सर्वसत्त्वदयालुत्वं सर्वेन्द्रियविनिग्रहः सर्वज्ञानित्यबुद्धिश्च श्रेयः परमिदं स्मृतं अत्रैवोदाहरंतीममितिहा

सं पुरातनं पितुः पुत्रेण संवादं तन्निबोध युधिष्ठिर द्विजातेः कस्यचित्पुत्रो मेधावी नाम नामतो भवत् सोऽब्रवीत्पि

तरं मा ज्ञात्वाध्यायवर्जनैरतः ॥ पुत्र उवाच ॥ मृत्युनाहन्यते लोके जरया परिवारिते व्याधिभिर्ग्रस्यमाने ५३

च किं स्वस्थ इति भाषसे अर्थोपायेय दानास्ति मर्तव्यस्य प्रतिक्रिया सोऽहं कथं प्रतितिष्ठे जालेनेवावृतः श्वि

54

रं राज्ञो राज्ञां वनीतां यां मायुरेतरं तया । अर्लोद्देकं मत्स्यस्थवच्छन्निं विंदति कः पुमान् कुतो न खलु दीर्घत्व
मायुर्बलानं देहिनां आदित्यरथवेगेन क्षीयते हि प्रतिक्षणं प्रतिक्षणं कालः क्षीयमाणेन लक्ष्यते आम
कुंभइवांभस्था विशीर्णो सद्विभाव्यते अभ्रस्य कलपद्मानालीनं तोयलवा स्थिरे स्थिरा प्राणा जीवितेयस्य नह्य
स्योनास्तिचेतनः ज्ञातमेवान्तकोन्वेति जराचान्वेति देहिनां अनुबन्ताकाद्भयेने स्वभावः स्थावरजंगमाः । ६
को हि विश्वासमर्हेषु शरीरेषु शरीरभृत् कर्तुमुत्सहते लोके हृष्टा संप्रस्थिते जगत् हरस्यमपि भावित्वा
द्विनाशे विद्युपस्थितं अयमेव हि यः कालः पूर्वमासीद नागतः आसन्नतरतामेति मृत्युर्जन्तूं दिने दि २
ने अर्घातेनीयमानस्य वध्यस्येव पदे पदे अन्यायेनात्यायबोधस्य महद्भयमुपस्थितं न तं पश्यामि लो
केस्मिन्यो न जातो न मरिष्यति इति संप्रत्ययं बुद्धा स्वस्थैलुकयमाप्यते नव्याधयो न यमः श्रेयः प्राप्तुं प्र
तीक्ष्यते यावदेव भवेत्कल्पस्तावत्समाचरेत् वाल एव चरेद्धर्ममनित्यं जीवितं यतः फलानामिव पक्का
नां प्रायश्च पतनं ततो भयं युवत्वापेक्षया बालो वृद्धत्वापेक्षया युवा मृत्योरुत्संगमारूढः स्थविरः किमुपेक्ष्यते ।
पापं परिहरेद्धर्ममात्मानं परिपालयन् वर्षाहजीर्णवित्ताहति न्नेवावसीदति व्रजंति न निवर्तंते स्रोतांसि।

रे॰ह॰ सरतामिव आयुरादायमर्त्यानांरात्र्यहानिपुनःपुनः अहोरात्राणिमासांश्चक्षणकाष्ठकलालवान् ।
५४ संपिंडयंतिकालोयंहानिवावृद्धिकंयथा यथागारंदृढस्थूलंजीर्णंभित्वावसीदति तथाचसीदतिनरः
कालस्यवशमागतः कालस्यवशमायांतिविवशाःसर्वदेहिनां नमृत्युमेवगच्छंतिविद्यायाश्चक्रचेतसः ॥
रात्र्यांयस्यांव्यतीतायांनकिंचिच्छुभमाचरेत् तमेववंध्यंदिवसमितिविद्याद्विचक्षणः भार्यामेपुत्रोमेच
मेविभवोस्तिगृहबन्धुसुहृद्योमे एवंवदंतमेवपुत्रमितिविनरंमृत्युर्नयति मृत्युरोगजराशोकैर्ग्रस्यमानः
२८ प्रतिक्षणं अजरामरवंनुकथंतिष्ठसिनिर्भयः अहोवासोमयाहृष्टंहाकष्टंसकथंमृतः मृत्युनाह्रियमा
नानांप्रलापःश्रूयतेनृणां कोजानातेकदावास्यमृत्युकालोभविष्यति युवैवधर्मशीलस्याद्नीतोनित्यंहि
जीवितं जीवितेमरणंतेहिजरांतंनूपयौवनं संपदोविपदांताहिअत्रकोरतिमाप्नुयात् यस्यवामृत्यु
नासख्यंयोवास्यादजरामरः नतस्येदंयुज्यतेवक्तुमिदंश्वोमेभविष्यति इदंस्वोनेरमखेतिनैतेर्मर्त्यस्ययु
ज्यते अवश्यंभाविताभिन्नःयस्मिन्नभविताभवान् नकश्चिदपिजानीतेकिंकस्यश्वोभविष्यति तस्मात्कृ
करणीयानिकुर्यादद्यैवबुद्धिमान् इदंकृतमिदंकार्यमिदमन्यत्कृताकृतं इदमेहासमःप्रोक्तंकृतांतःने: ५४

वशी ध्या२ 55

कुरुतेनैकं यो मोहेन हि समाविष्टः पुत्रदारार्थमुद्यतः कृत्वाकार्यमकार्यं वा पुष्टिमेषां प्रयच्छति तं पुत्र
पशुमित्रार्थं व्यासक्तमनसं नरं व्याघ्रा यस्तु निवाक्रम्य मृत्युरादाय गच्छति म स्यात्कस्यापि [illegible] मृत्युर्यदिव
प्रेप्स्येद्ययं जनः आहारोपि न रुध्येतति किं शक्ता कार्यकारिता स्नेहपाशैर्बहुविधैरासक्तमनसो जनः आप्ता
तार्थं सूसीदंति सैकतं स्येन वा यथा अपर्यंतस्य कालस्य किं यद्दाशाब्ददोशाते तन्मात्रं परमायुर्यः कश्चि स्व
स्यः सतिष्ठति दशावर्षाः षोडशिका विंशतिर्द्विंशतिस्तथा सर्ववर्षशतादूर्ध्वं न च तिष्ठंति मानवाः ।
संपदः स्वप्नसंकाशा यौवनं कुसुमोपमं तडिच्चंचलमायुश्च कस्य स्याज्जानतो धृतिः किमनेन करिष्या ।
ए० मि जरामरणभीरुणा अध्रुवेन शरीरेण मृत्युः छंदानुवर्तिना तृणानलनदीवेगस्वप्नसंकाशवृत्तिषु आ
युर्यौवनभोगेषु प्राज्ञः को नाम विश्वसेत् विश्वासमिह कः कुर्याद्रोगायुर्यौवनादिषु दृष्टा नाशमिवा
क्रांतं म्रियते मृत्युना जगत् इदं हि मरणावर्ते संसारोद्वेनिराश्रये जग[illegible]ति भ्राम्यमानस्य कर्मभिः अ
इदमेव करिष्यामि ततः एवं भविष्यति संकल्पः क्रियते यावन्न तं मृत्युः प्रतीक्षते अहमेको न मे कश्चिन्ना
हमन्यस्य कस्यचित् न तं पश्यामि यस्याहं न च सोस्ति हि यो मम एकः प्रसूयते जंतुरेक एव प्रलीयते एको
वा३

च२

३ हा॰ नभुंक्तेसुकृतंमेकएवचदुष्कृतं मृतंशरीरमुत्सृज्यकाष्ठलोष्ठसमंक्षितौ विमुखाबान्धवायांतिधर्मस्तम
५५ नुगच्छति बलिनोहन्तसिंहस्यसंसारवनचारिणः मृगानिवापिजराताःकथंतिष्ठसिनिर्भयः कलत्रपुत्र
स्य भृत्यैस्तुपशुद्रविणस्यच कियंतिदिवसान्तानयास्यंतिकुशलेनते यौवनंग्रस्यतेलोभैर्यावन्नोपैतिनिर्ज
रा यावन्नक्षीयतेचायुःतावच्छ्रेयःसमाचर पुत्रदारकुटुंबेषुसक्ताःसीदंतिजंतवः पापपंकार्णवेम
ग्नाजीर्णावनगजाइव लोहदारुमयैःपाशैर्मृतैर्बद्धोपिमुच्यते नचतेपुत्रदारेषुकर्त्तव्यामतिरीदृशी
कथंनकृपणाक्ष्येतेवर्त्तिष्यंतिमयाविना संगत्याजठरेत्यक्तेरेतोबिन्दुमचेतनं केनयत्नेनजीवंतंगर्भस्य
मिहपश्यसि अन्नपानादिजीर्यंतेयत्रभक्ष्यादिभक्षितः तस्मिन्नेवोदरेगर्भःकिंनात्रैवविजीयते यद्ग
स्य र्भेपालयत्येवयश्चसंवर्धयत्यपि तदेवस्वकंकर्महाविदुःखोपपादने स्वयंमत्पिंडभूतंस्वपरतंत्रस्यस
र्वशः स्वरक्षणेप्यसक्तस्यकोहेतुःकस्यरक्षणे जायतेस्वकृतैरेवसु कृतैरेववर्धते सुखंदुःखंम्रत्युंचस्व च
कृतैरेवविंदति कोहंपुत्रगमिष्यामिकस्याहंकिंमिहागतः कोबन्धुर्ममकस्याहमित्यात्मानंविचिंतय
नबन्धुरस्तितेकश्चिन्नत्वंबन्धुर्हिकस्यचित् पथिसंगतमेवैतद्दारबन्धुसुहृज्जनैः पुरासीत्स्वजनस्ते ५५

त्वं स्म

ने

56

न्यस्तोऽप्रतंवर्तयेत्परः एवंव्यवस्थितेलोकेकःकस्यस्वजनोजनः कोवापरजनःकस्यमोहएवचकेवलं सुद्द

रमयैःपाशैःमोहजैःकर्मभिः कोशकारइवात्मानंवेष्टयन्नावबुध्यते दह्यमानेहिलोकेस्मिन्महता

कालवह्निना कोलभेतधृतिंप्राज्ञःप्रदीप्तइववेश्मनि किंतेधनैर्बान्धवैर्वा किंतेपुत्रैश्चलुप्तैत्रिकैः आत्मान वे

मन्विच्छगुहांप्रविष्टं पितामहस्तेक्वगतःपिताच सर्वावासंसर्वगंज्ञानगम्यं योगिध्येयंवासुदेवंसम

ग्रं नित्यानंदंस्वयंतत्त्वंचिराय सर्वैर्द्वन्द्वैर्मोक्षमन्विच्छमानः ॥ नमातानपिताकश्चित्कस्य

चित्प्रतिपद्यते दानमध्ययनंजंतुःस्वकर्मफलमश्नुते स्वकर्मफलनिर्देशंविधातृविधिनिर्मितम् ।

भूतग्राममिमंकालःसमंतादपकर्षति हातातहा[illegible]कांतेतिक्रंदमानोमुहुर्मुहुः मंडूकइवसर्पेणमृत्युना

क्रम्यतेजनः जरामृत्युहिभूतानांखादितारौवृकाविव बलिनांदुर्बलानांचह्रस्वानांमहतामपि नक

श्चिज्जात्वतिक्रामेज्जरांमृत्युंचमानवः अपिसागरपर्यंतांविजित्येमांवसुन्धरां मृत्युंचेन्नविजेष्यतिकः

इति पुमान्स्वर्गनिर्भोगोभवेत् व्यत्ययोह्ययमत्यंतंपक्षयोःशुक्लकृष्णयोः जातंमर्त्यंजरयतिनिमेषंनातिवर्त

पांडत्वैवमूर्खंचबलवन्तंचदुर्बलं ईश्वरंचदरिद्रंच मृत्योःसर्वत्रतुल्यता ३

न

निमेषादशचाष्टौचकाष्ठात्रिंशत्तुताःकला । त्रिंशत्कलामुहूर्तंस्यात्तैस्त्रिंशद्भिरहर्निशं ।

श०ग० नै निमेषादिरयंकालाशो चुत्वान्सर्वदेहिनां हरत्यायुर्द्विजश्रेष्ठ नदीवेगइवप्लवं निमेषमात्रमपिते
५६ वयोगच्छन्नतिष्ठति तस्माद्देहेष्वनित्येषु यन्नित्यं तत्समाचर अनित्ये सतिमानुष्ये विद्युत्स्फुरणचंचले
येरमंतिनमस्तेभ्यः साहसं किं मतःपरं किमतःपरमन्यं तेकथयामिपुनःपुनः अनित्यं सर्वमेवेनह्यात्किं
चिदपिदृश्यते नदीं तृष्णामतीं ज्ञात्वा सर्वभावेष्वनित्यतां सर्वारंभान्परित्यज्य भविष्याम्यनुयोग
वित् आत्मज्ञानमधीयानो युंजन्नात्मानमात्मना आत्मज्ञो भविष्यामि नमां तारयति प्रजा पशुय
शौक पंहिं स्वैर्मांदृश्यायष्टुमर्हति अंतर्बहिः कृतप्रज्ञैः कृदयज्ञैः पिशाचवत् सोहंशुहिंस्रः सत्या
त्माकामक्रोधविवर्जितः जितेंद्रियः समेम्नत्वाम्नत्युंजेष्याम्यमर्त्यवत् अंतर्बहिश्च यत्किंचिद्दैवे
काग्रेसमाहितः तावत्स्यास्यामिनियतोयावत्तत्क्षयमागतम् विमुक्तविषयासंगेसन्निरुद्ध
मनोहृदि यदायात्युन्मनीभावंतदानिर्वाणमिच्छति कामक्रोधभयेनेहहतपस्तानश्चेतसः
पिशुनस्य कृतघ्नाश्च नालिकाभिन्नवृत्तयः एतत्प्रदानपश्यंति मोक्षद्वारमयाहृतं अश्वमेध । ५६

नत्सर्वसंवदित्यज्ञध्यानेनसुमनास्तपा मनसैवेंद्रियोरागांश्चवृत्यैव प्यसमाहितः ८

सहस्राणिराजात्सयशतानिच ध्यानयोगस्समर्वाणिकलांनार्हंतिषोडशीं भीष्मउवाच पुत्रस्य
तद्वचःश्रुत्वामोक्षधर्मविधित्सया तथैवकृतवान्विप्रोयथैतदव्रवीत्सुतः एवंसमाधायवचःप्रचो
दितःशरीरमध्यात्मधरंविचिंतयन् तथैवसर्वार्थविरक्ततापिवह्निजोत्तमःस्वर्गहरवेषुनिस्पृहः
१ सपोत्वचक्रेरविमंडलेस्थितंतुशेशयाक्रांतमनंतमच्युतं जगाम विष्णार्कमनीयवृपिणंद्विजो
त्तमाश्चित्रविभूषणोज्वलं इतिहाससमुच्चयेपितापुत्रसंवादोनामाष्टादशोध्यायः १८ युधिष्ठिरउ
वाच कथंनिर्वेदमापन्नःशुकोवैयासिकःपुरा एतन्मेतत्वतःसर्वंसमाचक्ष्वपितामह भीष्म
उवाच प्राकृतेनसुवृत्तेनचरंतमकुतोभयं अध्याप्यकृत्स्नंस्वाध्यायंपुत्रंव्यासोन्वयात्तदा १
व्यासःउवाच धर्मंपुत्रनिषेवस्वसुतीक्ष्णौचहिमातपौ क्षुत्पिपासेचकोपंचजहिनित्यंजिते
न्द्रियः धर्मादपेतंयत्कर्मयद्यपिस्यान्महाफल नतत्सेवेतमेधावीनहितद्धितमुच्यते एक
एवसुहृद्धर्मोनिधनेप्यनुयातियः शरीरेणसमंनाशंसर्वमन्यद्धिगच्छति न[illegible]सहायोर्थः
पुत्रस्या

रं.हा.
५७ पिताऽमाता च तिष्ठतिः नपुत्रदारानुज्ञातिर्धर्मस्तिष्ठतिकेवलं धर्मंहियेनपश्यंतिबुद्धिमोहान्विता
नराः अपथागच्छतांतेषांमनुयातोविनश्यति प्राज्ञिमानप्यशान्तोसोधनवानपिनिर्धनः श्रु
तवानसिमूर्खोपियोधर्मविमुखोनराः दुःखदुःखदानेषुप्रत्यंडाद्भवपादिषु नद्विधास्तेमनुष्ये
षुयेषांधर्मोनकारणं धर्मोमातापिताचैवधर्मोबंधुःसुहृत्तथा धर्मंचिंतयमानोपियादृशा
त्तैर्विमुच्यते ततःस्वर्गमवाप्नोतिधर्मस्यैतत्फलंविदुः यस्यविष्णोःपरोधर्मोयोवानारायणे
रतः येनविष्णोरमेयात्माप्रसादमधिगच्छति सएवपरमोधर्मःसर्वलोकपरायणः तेनस
र्वमिदंप्रोक्तंधार्यतेसचराचरं संचिंतितस्त्वाप्यनुमोदितस्तु दृष्टः श्रुतस्सात्वापितस्तुतोवा
सर्वाणिपापान्यपहंतिधर्मोनिशांतमोसीवसहस्ररश्मिः तस्मात्सर्वात्मनाजातधर्मंनित्यं ५७
समाचर स्वधर्मविमुखाःपीन्यतमस्यन्धेपतिष्यति येमनुष्याःश्रुतोपेताःसत्यार्जवदया

पराः जितेंद्रिया जितात्मानस्तानुपास्व च प्रछत्त एवधार्यमहं तेषां मुनीनां शीलिनां नियच्छ परया
बुद्ध्या मनस्तन्य थियामि वै मनो हि सर्वभूतानां संचितो ति शुभाशुभं शुभेयुक्तस्तदा दिव्य शुभे व्यैवावधा
रय कामं क्रोधं भयं लोभं दंभं द्रोहं मदं तथा निद्रां मत्सरमालस्यं नास्तिक्यं च परित्यज सत्यमार्जवमक्रो
धमानृशंस्यं परं तपः ब्रह्मचर्यमहिंसां च धर्मामिवानुपालय सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभं तथा
त्मानं समाधत्स्व भ्रश्यसे न पुनर्यथा क्रोधलोभपरो नित्यं निद्रालस्यपरस्तथा विषयेच्छापरश्चैव श्रेयसो
भ्रश्यते द्विजः यथा यथानि सेवंते विषयान्विषयात्मकाः तथा तथा कुशलता तेषां तेषूपजायते तेमूढ
हारभिन्नित्यं विषये हृतचेतसः संप्राप्नुवंति दुःखानि तिर्यग्भूतास्तु योनिषु विषयेषु प्रसक्तो हि नरः श्र
येन्न विंदति तस्मात्सर्वात्मना पुत्र विषयं विषवत्त्यज जन्मांतरशताभ्यस्ता विषयेषु मतिर्नृणां दुष्टा गो
रिव सस्येभ्यो दुःखेन विनिवार्यते निवर्तते विषयासक्तिमिंद्रियाणां प्रमाथिनी देवतानि यिशेषेनयाज्ञो
पाणस्य प्राप्यते यो महान्दर्शितः पंथा एष धर्मस्य पुत्रक ब्रह्मचारी गृहस्थो वा वानप्रस्थो थ भिक्षुकः यथो
ब्राह्मणस्य च देहांते नाप्नोगाय जायते इह लोके साध्यमेत्तिप्रेत्यानंतसुखाय च प्रशस्तानि निषेवस्व कर्माणि प्रयत्नतः एतावकर्मसर्वं नि

दशलक्षणकोधर्मः सेवितव्यः प्रयत्नतः धृतिः क्षमादमोस्तेयंशौचमिंद्रियनिग्रह धीर्विद्यासत्यमक्रोधोदशकंधर्मलक्षणं महांदशवि

धेयं पः एवध

ऋ॰ हा॰ कारिणः सर्वेगच्छंतिपरमंपदं अक्रुद्धस्तपस्वीसंतुष्टः समस्सत्योजितेंद्रियः दातादांतोदयावांश्चब्राह्म र्म स्पपुत्रक

५८ णोनावसीदति ॥ अप्रमत्तः प्रजाभेननोवान्येनकुकर्मणा इहैवनर्के व्याधेश्चिकित्सांनकरोतियः ग

त्वानिरोषधंस्थानंसरुजः किंकरिष्यति पारुष्यमनृतंहिंसांपरस्वंपरयोषितां पैशुन्यंलोकवार्तांच

पापमित्रांश्चवर्जय यथानसाध्यतेधर्मः कामार्थौवानिश्चितौ नतांवाचंवदेत्प्राज्ञः परलोकविरो

धिनीं परलोकहितांनित्यंशास्त्रदृष्ट्यानुचिंतय अत्रैवकर्मणामेवविपाकंपरिचिंतय ब्राह्मणस्यहि

देहोयंनोपभोगायजायते इहक्लेशायमहतेप्रेत्यानंतसुखायच प्रशस्तानिनिषेवस्वस्वकर्माणित्व

यत्नतः अतःस्वधर्मसर्वस्वंनिर्मितानिचवर्जय ऊर्ध्वबाहुर्विरौम्येषनकश्चिच्छृणोतिमे धर्मादर्थश्च र्प

कामश्चसकिमर्थंनसाध्यते पूर्वेवयसियोधर्मंनकरोतिविमूढधीः सपश्चादनुतप्यतेसतोनरः स्वी

र्थकामगः ग्रामेवानगरेवापितीर्थेवायतनेपिवा नपुत्रस्तत्रवास्तव्यंयत्राधर्मापरोजनः अप्रमत्तेन

सततंधर्मकार्यंविजानिता सहस्रामरणेप्राप्तेधर्मःकर्तुंनशक्यते अत्रैवत्वंजराश्रेणोमानाक्कालोन्वगा ५८

गात्रं अकृतेष्वेव कार्येषु मृत्युर्वै संप्रकर्षति जरां मृत्युं च व्याधिं च को विजानन्न चेतनः स्वस्थ
स्तिष्ठेन्निर्विषण्णो हा स्वयं हा किं पुनर्हि सेत जन्म व्याधिजरादुःखैर्वेदनाभिर्हतं जगत् असारमिव संसारं
त्यजेन्नैव पुत्रकोपुवे स्वकर्मणा निवर्तन्ते ज्ञातिसंबंधिबान्धवाः येन ते सह गंतव्यं तत्कर्म सुकृतं कुरु ।
धं मृतजीवितमन्यन्तरा चित्तसंसारकारिणी व्याधिशोकजरायासैरर्थ त्रष्टापि निष्फले म्रियन्ते जन्मने
मृता जायन्ते मरणाय च धर्माय न तु मोक्षाय तरुणानीव पश्य जनाः तुल्यजातिवयोरूपान् हृतान्
पश्यसि मृत्युना नैनामास्ति च तत्रासो स्त्रो हं तु हृदयेन वै शतसापि समेत स्मशानायुर्नैव विद्यते
आत्मामात्रमिदं पुत्रां पश्चिरेवायुरन्नमे तोयफेनोपमे देहे जीवे चास्थिरसंस्थिते अनित्ये प्रियसंवा
से कं च्यैत्वपसि पुत्रक अहिते हितबुद्धिस्त्वमध्रुवे ध्रुवसंज्ञक । अनर्थे चार्थविज्ञानं स्वमर्थं नाव बु
ध्यसे पुत्रदारकुटुंबानि शरीरे संचया श्रमे पारार्थ्यमध्रुवं सर्वं किं स्वे सुकृतदुष्कृते स्वसुदुःखाः
ति मृतानि व्रजेरोजरयन्नसौ आदित्योह्यस्तमभ्येति पुनः पुनरुदेति च नसाहसौ विनिर्भिन्नो विरक्तः

रं॰हा॰ विषयसर्पभ्या रागद्वेषानलेपक्वं मृत्युरश्नाति मानवं महान्तोतिदिनखंडानि पश्यंत्यग्रतएव ते आयु
र्विछिद्यमानानि मृत्युनाकिं न पश्यसि वहुकृत्यो निरुद्योगो जागर्तव्ये प्रसुप्तकः किमुत्स्थो कोभयस्था
५८ नेहामुत्रकाविहन्यसे सन्यापारस्तपल्लैरर्द्यावर्त्तिःदामाशिखा ग्रंधकारे प्रवेष्टव्यं दीपो यत्नेन धा
र्यतां यदा सर्वं परित्यज्य गंतव्यमवशेन ते न तत्कथं पत्नीमाद्रातिमृत्युपाशैरिवाहतः मृत्युः जराव
रोगश्च दुःखानि विविधानि च अनुषक्तानि ते देहे स्वस्थः किं मनुतिष्ठसि तिष्ठंतं च व्रजंतं च मृत्युरन्वेति
देहिनो निवृत्तिं लभते कस्मात् जले मीनद्भवोद्यनः रौजेदृश्विन्नपश्चानंप्रचंडव्याधिसैनिकं मृत्यु
चक्रमनुष्ठानमायांतं किं नु पश्यसि यस्तामपि तनयासं जनेन कश्चिदनुयास्यति एकाकिनाच गंतव्यं
स्वमादाय शुभाशुभं शुभाशुभं समादाय जंतुरन्यत्र गच्छति अन्यत्रैव हि गच्छंति तिलहस्तं संबंधिबान्धवा।
नैनं सहस्रमनुयाति नवन्धुवर्गो नार्थः प्रयत्नरचितान च पुत्रदाराः तस्मिन्क्षणेप्रियशतानि।
विहायतानि प्राणः स्वकर्मफलपथ्यभुजः प्रयांति मातापितृसहस्राणि पुत्रदाराशतानि च न तेषां ५८

स्वं

भवनाकार्यंनकार्यंनवैत्तैरपि सहकैतैलानियातानानित्वमेष्योकोगमिष्यसि वर्षास्वेवंकरिष्यामिग्रीष्म
हेमंतयोरिदं इत्येवंचिंतयन्मूढोनांनरायंपुरुषप्रपत्ति पश्यामिन्नपिंप्रावलम्घएवन्नपिनबुध्यते सर्वे
क्षामिंद्रियैरेभिर्बुद्धिमानपिवंच्यसे महाजालसमाःकृत्वानपश्यपज्जंतून्दुःखितान् निर्वाण्तिनींनां
क्किंदंतिदुःकृती अहिंसाहन्त्यसंतोषक्षजुत्वंद्वीनपोमयी नावमारुह्ययत्नेनसंसारार्णवमुत्तर
प्रयास्यतोकिमाश्रितेस्मास्थितेमहाभये आतिश्मार्दहारुणेतपोमहत्समाचर नपुत्रवान्धवादारन
संमत्रप्रियोजनः अनुव्रजंतिसंकटेप्रयन्तमेकयायिनं यदेवकेवलंकर्मस्वयंकृतंशुभाशुभं तु
तस्मा१ देवमार्थिकंपुत्रभवंतुलस्यगछतः नतत्रसंविभज्यतेस्वकर्मणापरस्परं कृतंशुभाशुभंकर्मस्वयंतद्धे पथ्या१
वभुज्यते यदात्वमेवदृष्टतत्त्वमग्रतोभविष्यसि यदागतिंगमिष्यतःकिमात्मजैःपरेणवा नयावदे
वपश्यतेमहाजनस्यपावकः अपक्वएवपश्यतेपुराप्रसीयतेनरः गतेहिरव्दवर्षकंप्रवोपिपंचविंश
कः कुरुष्वधर्मसंचयंवयोहितेविवर्धते इदंजराकलेवरंविजर्जरंकरोतिते बलांगरूपनाशिनीति
धत्त्वसोकृधनं धनस्ययस्यराजतोभयंनचाग्निचौरतः मत्तेचयन्नमुच्यतेत्वमर्जयस्वतद्धनं स

इ॰ह॰ हत्वस्त्रोप्यिशुक्रकमब्रवीमित्तत्रदेवते अशाश्वतेहिजीवितंकुरुष्वधर्मसाहतः नास्तिधर्मोवन्धुर्नास्तिध
६० र्मसमःसुहृत् नास्तिधर्मसमोलाभोनास्तिधर्मसमागतिः यथायन्त्रेवागनोमत्तंयोधर्मनाचरेन्नरः अजा
गलस्तनस्येवतस्यजन्मनिरर्थकं व्याहृजेनामितानातधर्मोकार्योनरैः तरात् मेषीबद्धोपिहित्वा
स्पघोसग्राहोकरोतिगोः एकस्मिन्नप्यतिक्रांतेदिनेधर्मविवर्जिते दस्युभिर्मुषितस्येवयुक्तमाक्रंदि
तुंचिरे प्रायशःक्षीणपापस्यनित्यंधर्मपरस्यच यमीशुत्ययतेज्ञानंज्ञानान्मोक्षंचविंदति कर्मणाम
नसावाचायोधर्मनिरतोनरः तत्फलंनचकांक्षेतिसमोक्षमधिगच्छति शुकःउवाच ज्ञानामेविवि
धाधर्मःप्राणिनांचाप्यनित्यता सांप्रतंमोक्षतत्वार्थंभगवन्वक्तुमर्हसि व्यासःउवाच नान्यत्र
विद्यातपसोनान्यत्रेंद्रियनिग्रहात् नान्यत्रसर्वसंत्यागात्मोक्षंविंदतिमानवः जीवितंयस्यधर्मार्थं
५ धर्मोज्ञानार्थमेवच ज्ञानंचध्यानयोगार्थंमचिरात्सप्रमुच्यते सर्वसंगपरित्यागसर्वद्वंद्वसहिष्णुता ९०
सर्वद्वंद्वसमत्वंचमोक्षस्यविदुरुत्तमं इंद्रियाणिमनश्चैवपिंडीकृत्यसमंततः एकाकीनित्यमास्थाय

परंब्रह्माधिगच्छति तपश्चासनतोयोगोनानासाग्रनिरीक्षणात् मनसश्चेंद्रियाणांचसंयोगोयोगमुच्यते
कर्मणामनसावाचावाससुदेवमतेंद्रियः भजतेसर्वलोकेशंसमोक्षमधिगच्छति एतदेवपुराख्यानमेतदे
वपरंतपः एतदेवपरोयोगएतदेवहिसाधनं अस्मिन्नेवसमाधानेधारयत्वंमनःसदा नात्रेष्टव्याविशेषा
भीष्मउवाच स्तेविशेषाविघ्नकारकाः एहैपायनवचोनिशम्यचशुकोगतः परित्यज्यस्वपितरंमुनिमोक्षपरायणाः
तपोवनेजगामाथनिवृत्तविषयात्मकः समःसर्वेषुभूतेषुध्यानयोगपरोभवत् प्रणम्यविष्णो
पुष्प स्वरणांबुजाभ्यांतस्मैवसुनिपुंगवाय स्वस्वप्रयतेंद्रियचित्तवृत्तिः प्रयोमहात्मापरमार्थकांक्षी
भीष्मउवाच तस्मात्त्वमपिराजेंद्रयोगयुक्तःसदाभव शुकानुशासनंज्ञात्वाह्यमृतत्वमवाप्स्यसि
वैशंपायनउवाच एवमुक्तस्तुभीष्मेणधर्मपुत्रस्तदाहृष्टवान् एकाग्रमनसोभूत्वाधर्ममास्थायवैतदा य
इदंशृणुयान्नित्यंव्यासेनपरिकीर्तितं विमुक्तःसर्वपापेभ्यःपरंब्रह्माधिगच्छति इतिहाससमुच्च
येशुकानुशासनेनामएकोनविंशतितमोध्यायः १९ युधिष्ठिरउवाच इदंदेयमिदंदेयमिति
संस्कृतिनोदना बहुदेयाश्चराजानस्तैर्देयंकिंविशेषतः भीष्मःउवाच सर्वेषामेवदानानांभूमि

दे॰ हा॰
६८

दानेवरेस्मृतं सर्वपापहरं तथा स्वर्ग्यमायुर्मनीषिणः। भूमेस्सर्वाणि दानानि संभवंति न संशयः त
स्माद्भूमिप्रदो राजन्सर्वदः प्रोच्यते बुधैः सुवर्णं रजतं वस्त्रं धान्यानि विविधानि च सर्वमेतन्महीपाल ददा
ति नद्राकान्तुदवानानि नगान्पुष्पफलान्वितान् वस्त्रन्सर्वरसांश्चैव ददाति वसुधां ददत् भूमिं सर्वगु
णोपेतां यो दद्यात्सस्यशालिनीं न तस्य लोकाः क्षीयंते यावत्तिष्ठति मेदिनी अग्निष्टोमादिभिर्यज्ञैरि
ष्ट्वा विपुलदक्षिणैः न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते नपस्विनो यय अर्जुन! सत्यवंतो बहुश्रु
ताः गुरुदेवरताश्चैव नातिक्रामंति भूमिदं अत्र गाथां पुरागीतां कीर्तयंति पुराविदः यांस्कृत्वा जमद
ग्न्येन प्रदत्ता कश्यपाय भूः माम दत्त्वा प्राप्स्यसे दत्त्वा मां समवाप्स्यसि अस्मिंल्लोके परे चैव ततो दद्दत्तु नपा॰ १
मां जनाः सोयं धीरः सपुरुषः सविद्वान्सर्वपुण्यकृत् स दांतः स च विक्रांतो यो ददाति वसुंधरां त्व
त्सुवैं किंकरोस्त्वंडाला पोवन्हेस्तदारुणः छोराश्चवारुणाः पाशानो सर्पंति भूमिदं ब्राह्मणाय महीं द प॰ २
त्वा सर्वसस्यफलान्वितां सर्वकामांल्लभेत्स्वर्गे यावदासते हि मेदिनी श्रोत्रियाय दरिद्राय बहुभृत्याय सी
दते दत्वा भूमिं गुणोपेतां सर्वान्कामानवाप्नुयात् श्रोत्रियाच्छीलाय वैस्म्वाय युधिष्ठिर प्रदत्ता ६१
भूमिर्निर्मूलयेत्सायुत्कायुक्तात्मीनोरागो हनाः स्वर्गलोकगताः सेतो नातिक्रामंति भूमिदं ६

येनभूराजन्सोक्षयंफलमश्नुते अत्राप्युदाहरंतीममितिहासंपुरातनं बृहस्पतेश्चसंवादंमिंद्रस्यचम
हात्मना। इंद्रउवाच भगवन्केनदानेनस्वर्गतःसुखमश्नुते यदक्षयफलंप्राहुस्तन्मेत्वंवक्तुमर्हसि
बृहस्पतिरुवाच भूमिदानसमंदानंनापरंविद्यतेक्वचित् एवमाहपुराशक्रभगवान्मेपितामह
पंचपूर्वान्स्वपुरुषान्नरःषट्चतथापरान् एकादशापरित्रातिसप्तांश्चमह्यांददन् इक्षुभिःसहितांभू
मिंयवगोधूमशालिनीं योददातिद्विजश्रेष्ठेनसप्रच्यवतेदिवः शय्यासिंहासनंछत्रंवरांश्चावरयो
षितः भूमिदानस्यपुण्यस्यफलंस्वर्गंपुरंदर यथाचंद्रमसोवृद्धिरहन्यहनिजायते तथाभूमिकृतंदा
नंसस्येसस्येविवर्धते यत्किंचित्पुरुषःपापंकुरुतेवृत्तिकर्षितः तत्सर्वंभूमिदानेनस्वल्पेनापिप्रणश्य
ति भ्रूणहाब्रह्महावैश्चैःपितृघ्नोगुरुतल्पगः भूमिंसर्वगुणोपेतांदत्वापापैःप्रमुच्यते सीदतेबहुभृत्या
यश्रोत्रियायाहिताग्नये भूमिंवृत्तिकरींदत्वास्वर्गीभवतिमानवः कृत्वाहिसुमहत्पापंभूमिंदत्वाद्विजातये ॥
सस्वर्गंजातिपापोयथाजीर्णत्वचमिवोरगः यस्यविष्णुःपरंज्ञानंयस्यविष्णुःपरंमनः यस्यविष्णुर्जगद्योनि।

रह वीहरेद्वेहदिस्थितः नस्मैदेयामहावाहोभूमिस्सर्वगुणान्विता तस्मात्त्वंभूमिदानस्यपात्रमस्तीतिमेमतिः स्वस्थो
९२ तरं वहुविधंजल्पेतिपरमर्षयः सयजेदश्वमेधेनयज्ञदध्याद्दक्षिणां परां विमानंकामगंदिव्यंदिव्यस्त्रीगणशोभि
तं उपतिष्ठतिदेवेंद्रस्वर्गलोकवरप्रदं श्रोत्रियेहविःसंपन्नेचाहिताग्नौदृढव्रते प्रतिपाद्यमहीतस्मैनयातिय
ममंदिरं येपिसंकीर्णकर्माणोराजानःपापचेतसः तेपिदत्त्वामहींसद्योमुच्यंतेसर्वकिल्बिषैः नास्तिभूमि
151 समंदानंनास्तिभूमिसमोनिधिः नास्तिभूमिसमोधर्मोनोपापमनृतात्परं भीष्मउवाच इत्येवंभूमि
दानस्यफलंश्रुत्वासवासवः वहुधांवहुसंपूर्णांकृत्स्नामंगिरसेददौ तस्मात्त्वमपिराजेंद्रस्ववीर्यापा
र्जितांमही स्वाध्यायहविर्युक्तेभ्योविप्रेभ्योदेहिमेदिनीं युधिष्ठिरउवाच आनामेकुरुशार्दूलभूमि
दानस्ययेगुणाः अपहारेतुयेदोषास्सर्वंतान्ब्रूहिसांप्रतं भीष्मउवाच षष्टिवर्षसहस्राणिस्वर्गेमोदति
भूमिदः आछेत्ताचानुमंताचतान्येवनरकेवसेत् विंध्याटवीष्वतोयेषुशुष्ककोटरवासिनः कृष्ण
सर्पाहिजायंतेब्रह्मदेयापहारिणः नाच्छिन्द्यात्परदत्तांचवहुधांवहुधाधिप श्रोत्रियायदरिद्रायव
हुभृत्यायचैवनृप यत्नतस्त्वहुतेषांहिदीनानामवसीदतां निराशानांहृतेदेवेनिर्दहेत्सकुलंतुले म ९२

हृतामपि पापानां दृष्टा शास्त्रेषु निष्कृतिः विप्रदत्ताः प्रहर्तॄणां न दृष्टा निष्कृतिः क्वचित् स्वदत्तां परदत्तां वा यो
हरेत वसुन्धरां स तिर्यग्योनिमाप्नोति जातो जातः पुनः पुनः सशैलनगरग्रामा ससरिद्वनकानना तानि
दानानि पश्यामि ये भुञ्जे यं वसुन्धरा आसीदियं पुरा राजन् दिलीपनहुषस्य च ययातेरम्बरीषस्य मांधातु
भरतस्य च अन्येषां नृपसहस्राणां यान्न हर्तुं व्यापातुमुत्सहे तेभ्योप्याप्तापि संप्राप्तात्वत्तस्थान्यो भविष्यति तथा
प्येनां महाराज राजानो ज्ञानमोहिताः न प्रयच्छंति विप्रेभ्यो दत्तामन्ये हरंति ये सर्वं दत्तां द्विजातिभ्यो यत्ता
द्युत युधिष्ठिर महीमतिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनं बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः यस्य यस्य
यदा भूमिस्तस्य तस्य तदा फलं तस्मान्न यान्न हर्तव्या भूमिर्द्विजानां कदाचन यदीच्छसि महाराज शाश्वतीं
गतिमात्मनः सीमांविवादे संप्राप्ते सीम्नः सूदम सदर्शनात् दातव्या नैव हर्तव्या हरणे किल्बिषी भवेत्
दानात्स्वर्गं कुरुश्रेष्ठ हरणात्किल्बिषं ध्रुवं तस्मात्सीमा न हर्तव्या न पापमपि किंततः यद्गतिस्त्रावयेस्त्रा
द्धे भूमिदानस्य संकल्पं अक्षय्यमन्नपानं तत्पितॄणामुपतिष्ठति ॥

॥

॥

इ॰ह॰ इतिहाससमुच्चये भूमिदानेनाम विंशोध्यायः २० युधिष्ठिर उवाच गवां दानं महापुण्यमेवमा

६ हुर्मनीषिणः विस्तरेण महाप्राज्ञ तन्मे ब्रूहि पितामह भीष्म उवाच न गोदानात्परं किंचिद्दानमस्तीति

मे मतिः यागोन्यायार्जिता दत्ता कृत्स्नं तारयते कुलं अमृतं वै गवां क्षीरमित्युवाच प्रजापतिः तस्मा

द्ददाति यो धेनुममृतं स प्रयच्छति समानवत्सां कपिलां धेनुं दत्वा गुणान्वितां सवत्सां हि मस्य गाग्रीन

रः स्वर्गे महीयते ४ यावद्वर्ष प्रसूता गौस्तावत्सा पृथिवी स्मृता पृथिवी तेन दत्ता स्यात्तादृशीं गां ददाति यः

एकां गां दशगुर्दद्याद्दश दद्याच्च गोशती शतं सहस्रगुर्दद्यात्सर्वे तुल्यफला हि ते युधिष्ठिर उवाच दे

याः किंलक्षणा गावः कीदृशाश्चापि वर्जयेत् कीदृशाय प्रदातव्या न देयाः कीदृशाय च भीष्म उवाच

तरुणी रूपसंपन्ना हस्तशीला पयस्विनी न्यायार्जिता सवत्सा च प्रदेया ब्राह्मणाय गौः वृद्धा सरोग

हीनां गां वन्ध्यां दुष्टां मृतप्रजां दूरस्थां स्यायलब्धां च न देया गौः कदाचन सीदते बहुभृत्याय

श्रोत्रियायाहिताग्नये अतिथिप्रियदीनाय धेनुं दद्याद्गुणान्विते अकुलीनाय मूर्खाय पलब्धायापि

समुद्रवसना भूमिः सशैलवनकानना रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ब्रह्महत्यादिपापघ्नं स्मृतं ... पितृघातकः महापातक ६

प्रजेषु स्मिन्वां दानेन सद्गतिः ॥ ६

साक्षहिनाय दुष्टाय पूर्तीयस्तं तावत् सर्वं फलं … पापायन देयाणि कदाचन

नी

श्रुनायच हृष्यकव्यपेनायनदेया गोःकदाचन प्रसादादयत्रसौवर्णशय्यारत्नोज्वलालया वरा
श्वाप्सरसोयत्रतत्रगच्छंतिगोप्रदाः गोप्रदान्नरोयातिब्रह्मलोकंसनातनं विमानेनार्कवर्णेनदिव्यर
त्नविराजिना सद्रूपवेशपःहृष्टाएपःहनेत्रावरयोषितः वेणूनांवल्लकीनांचनूपुराणांचशिंजितैः
गीतैश्चहृहरिणाद्येणांसुप्तःसंप्रतिबुध्यते अत्रैवोदाहरंतीममितिहासंपुरातनं अथेरुद्दालकेर्वाक्य
नासिकेतस्यचोभयोः ऋषिरुद्दालकिर्दीक्षांनप्राप्य तंतनयस्सुतं त्वंमामुपचरस्वेतिनासिकेतमभा
षत समाप्तेनियमेतस्मिन्महर्षिः प्राहतंसुतं उपसर्पणसक्तस्यस्वाध्यायनिरतस्यच इध्मादर्भाःसुमनसः
कालाःसर्वंजलांतिके विस्मृतंमेनदादाय तुनदीतीरमितोव्रज सगत्वाप्राप्यतेसर्वंनदीवेगहृतंप्लुतं न
दृष्टंतन्मयातत्रपितरंप्रत्यभाषत क्षुत्पिपासाश्रमाविष्टोमुनिरुद्दालकिस्ततः यमंपश्येतितंपुत्रमशप
त्क्रोधमूर्छितः ततःसपित्रानिहितोवाग्वज्रेणकृतांजलिः प्रसीदेतिध्रुवन्नेवंगतमोर्व्यपतद्भुविंनिरिक्ष्याप
तितंपुत्रंसमुनिःशोकमूर्छितः किंमयाकृतमित्युक्त्वापरिषद्धरोदच तस्कृत्वामुनयःसर्वेतपोवननिवासि.

र्विकंनासिकेतस्यचोभयो ऋषिरुद्दालकोदीक्षामनाभिगम्यनतं सुतंद

यमोब्रवीत्त्वं नमृतो महर्षेवैर स्थ न

नाःहा नः आगमत्तुल्यरूपः स्वालेपरिवार्योपपन्नशिरे पेतेणाधास्वपानैकं नचिकेतस्समनुशासितः उदतिष्ठत्प्रभातो
१५ नेरदृष्ट्वा प्रणम्यमिवाप्नुतं तं सतं सोथ पप्रच्छ देणसुतमिवोत्थितं यदृष्टं तत्र ते पुत्र तत्सर्वं कथयस्व नः हे
दृष्ट्वानुमां तत्र गतं हृदेवो यमं पश्यप्रेत्याह पिता भवंतं न चैनं कामं तत्र तं विप्रकर्तुं हृष्टः सो हं प्रतिगच्छार्थ सोम्य
सोचन्यसेभ्यलवदेहकर्ता करोमि किं वापि मनः प्रियं ते प्रियाति थेर्वरमिष्टं वृणीष्व मत्युक्तः ब्रुवं हं धर्मराजं न्तमह३
यावे यदि प्रसन्नो भगवन्ममाद्य स्थानानि मे दर्शय गोप्रदानां ततः स मां नोपसमं विमानं मत्प्रभुत्तेद
र्शयामास लोकान् अथापश्यं महं तत्र विमानानि सहस्रशः वैडूर्यार्कप्रकाशानि जांबूनदमयानि च
दिव्यरत्नविचित्राणि सेवितान्यप्सरोगणैः सर्वकामसमृद्धानि कामगानि स्थिराणि च मधुक्षीरव
हानद्यः सर्पिर्दधिवहास्तथा भक्ष्यभोज्यवहाश्चैव शैलाः शतसहस्रशः सर्वं दृष्ट्वा तमहं धर्मराजं मवो
चं विस्मयाविष्टचेता क्षीरस्येताः सर्पिषश्चैव नद्यः शश्वत्स्रोतः कस्य भोज्याः प्रदिष्टाः यमोब्रवीद्विद्धि
भोज्यास्तमेता ये दातारः साधवो गोरसानां लोकाश्चैते शाश्वता वीतशोका दिव्यानद्योः गोप्रदानां नरा
णां श्रुत्वा चैव तत्तत्र च स्तमहं पुरा वेन्न॥ अगोदो गोप्रदानं च यथा लोकं समश्नुते यम उवाच ॥ ९५

नेवु त्ते

यत्नाभ्येयो गवां दद्यात्तिलधेनुं समाहितः सर्वकामवहां दिव्यां सनंदीहस्वर्गमश्नुते तिलाभावे तु योदद्यात्
जलधेनुं यथाविधि सर्वान्कामानवाप्नोति नात्र कार्या विचारणा घृतधेनुं नरो दद्यात्तिलधेनुमथापि
वा जलधेनुं यथायो वै न च प्रच्यवते दिवः जितेंद्रियाय शांताय वेदस्वाध्यतपस्विने धेनुं दत्त्वा घृतमयीं
विष्णुसत्लोकमाप्नुयात् पितरं चैव धर्मात्मा पितामहमथापि वा (पितरं चैव धर्मात्मा पितामहमथापि)
घृतधेनुं परित्राति सप्तसप्त च सप्त च एतत्सर्वं दर्शयित्वा प्रहृष्टः भूयोभूयः प्राह वैवस्वतो मां दानेना
त्वं कुरुष्वात्मवित्तं सर्वेषां वैगौरसानां विशेषवान् ॥ असोमस्त्वरसास्तु दद्यात् धेनुं दद्यात्सगुणां कांस्य
दोहां स्वहेमशृंगीं वस्त्रेणोत्तरीयां यावंति रोमाणि भवंति तस्यास्तावद्वर्षाण्यश्नुते स्वर्गलोकं तथा
नद्वाहं श्रोत्रियाय प्रदत्त्वा दांतं धुर्यं बलवंतं युवानं कुलाजीव्यं वीर्यवंतं महांतं प्राप्नोति लोकान्दशधे धं ८
नुदस्य इत्युक्तोहं धर्मराजेन तात धर्मात्मानं शिरसा तं प्रणम्य अनुज्ञातस्तेन देवेन चैवं प्रत्यायातो
भवतः पादमूलं प्रार्थयेयं भवतोनुग्रहोयं यस्मात्स्वर्गे तान हष्टः सदेवः दानोत्कर्षं तत्र हष्ट्वा गवां च ।

दा०
२५

निःसंदिग्धं गां रुद्रांहं प्रदास्ये गावो देयाव्रहदेवस्ततस्ते लोकान्प्राप्तुं वै सर्वान्ते पुण्यकर्मभ्यः एतत्पुण्यं
ब्रूहि विद्वन्नराणामित्या दिष्टे धर्मराजेन तात भीष्म उवाच एतच्छ्रुत्वा तु मुनयः सर्वे ते विस्मयं गताः ग
वां तु वं तो माहात्म्यं जग्मुस्ता नाश्रमान्प्रति एतच्छ्रुत्वा तु कौंतेय गवां माहात्म्यमुत्तमं गावः प्रदक्षिणी
कुर्यात्पूज्यास्त्वं पानं च शीलोपपन्नां वत्सनौ ह्नरीयां कास्यो पदोहां कनकाग्रशृंगी विप्राय दत्त्वा
भगवत्प्रियाय प्रयाति लोकानमृतान्स पुण्यान् इतिहास समुच्चये नासिकेतोपाख्याने गोदानि
कोनाम एक विंशमोध्यायः २१ ॥ युधिष्ठिर उवाच सर्वेषामेव दानानां यद्दानं हि महत्फलं ।
सद्यः प्रीतिकरं चैव तन्मे ब्रूहि पितामह भीष्म उवाच इदमर्थं मया पृष्टो देवर्षिर्नारदः पुरा यदुक्तवा
न सौ राजंस्तन्मे निगदतः शृणु नारद उवाच नान्नदानात्परं दानं किंचिदस्तीति जनेश्वर अन्नेन धार्य
ते सर्वं चराचरमिदं जगत् अन्नेन प्राणिनां प्राणा इत्युवाच प्रजापतिः तस्मादन्नप्रदो राजन्प्राणदः
प्रोच्यते बुधैः अन्नदः पशुमांल्लोके पुत्रवान्रूपवानपि आयुष्मान्भोगवांश्चैव बहुस्त्री चर्ष्टे त्वजायते २५

ब्राह्मणा गावो चैव कुलमेकं द्विधा कृतं एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठति गोषु प्रसूता वस्य भावाहितास्ते घुरं घराः संपादयंति सस्यानि होत्व्यो
निधनं जगत् सर्वदेवमया ह्येताः सर्वमंगलसंयुताः ब्रह्मलोकादिहायाता तत पश्चार्थं सदुष्करं गावो ममाग्रतो नित्यं गावः पृष्ठत एव च गावो मनसि तिष्ठंति
गावो मध्ये वसाम्यहं गावः पवित्रमतुलं गावः पावनमुत्तमं २८

न्यं न्न

निःदद्यात्तियश्चामतिथिभ्यःसमाहितः सयातिब्रह्मसायुज्यमेवमाहपराशरः अन्नेनसदृशं
दानंनभूतंनभविष्यति तस्मादन्नंविशेषेणदातुमिच्छंतिसाधवः कृत्वापिसुमहत्पापंयः पश्चाद
न्नदोभवेत् विमुक्तःसर्वपापेभ्यःस्वर्गलोकंसगच्छति आशंसन्तीहिपितरःसुवृष्टिमिवचातकाः ।
कदास्माकंकुलेपुत्रःपौत्रोवान्नप्रदास्यति योदद्यात्परिक्लिष्टमन्नमध्वनिवर्तिने श्रान्तायादृ
ष्टपूर्वायसपुण्यांपागतिमाप्नुयात् नपृच्छेद्गोत्रचरणंनस्वाध्यायंश्रुतंतथा याचितंब्राह्मणेना
न्नंदद्यादेवाविचारयन् दुर्वृत्तःसाधुवृत्तोवामूर्खःपंडितएववा यःप्राप्तोवैश्वदेवांतेसोतिथिः
स्वर्गसंगमः अदृष्टंदृष्टपूर्वंवामित्रंवासुहृदंतथा ब्राह्मणंभोजयेन्नित्यंशांतंशीलसमन्वितं गा
यत्रीमात्रसारोपिवरंविप्रःसुयंत्रितः नायंत्रितश्चतुर्वेदीसर्वाशीसर्वविक्रयी ईश्वरःसर्वभूतानांहृद
द्येसमवस्थितः तस्मादतिथयेकार्योभावःसोयमिहागतः पादाभ्यंगैःशिरोभ्यंगैर्दीनमानार्चनादि
भिः म्रष्टवाक्यैर्विशेषेणपूजनीयोद्विजोत्तमः अन्नंदत्वातुविप्रेभ्यःकमंडलमयच्छति स्वशितःसलि

दा॰
१६६

लोपेनान्तोपि स्वर्गमवाप्नुयात् अन्नं दद्यादतिथये यस्तु श्रद्धासमन्वितः दत्वा स्वर्गमवाप्नोति देवैश्चाप्य
भिपूज्यते प्रियतां विष्णुरित्युक्त्वा वैश्वदेवं शांतमानसं भोजयेन्मिष्टमेवान्नं यथाशक्तिसमन्वितः श्रा
राध्य वैश्वदेवं यो तं सदानद्भावनिष्ठिते प्रीयतां भगवान्विष्णुरिति संकल्प्य भोजयेत् मिष्टान्नमपरिलि
हं पार्वकराद्यं च कृतात्युतं दष्युन्नरयथाशक्ति दानं च भुक्तमिच्छता ब्राह्मणेभ्यः प्रतिश्रुत्य न दद्याद्यो
न्नमन्नदः स याति नरकं घोरं तिर्यग्योनिषु जायते प्रियातिथिर्गृहस्थो यः संतुष्टो विजितेंद्रियः नय
स्वाध्यायनिरतः स्वर्गस्तस्य न दूरतः भीष्म उवाच नारदैवमुक्तःस्तु प्रार्दमन्नेमहं सदा अन्नेन प्राणिस
मुत्पन्नमन्नं देहि युधिष्ठिर अन्ने दत्ते मनुष्येभ्यः प्राणदत्तो भवति वै प्राणदानात्परं दानं दानमन्यन्न
विद्यते श्रुतं मयातीलोमशस्यापि तद्वचः प्राणं दत्वा कपोताय यत्प्राप्तं शिविना पुरा ताहृशीपु
रुषव्याघ्र स प्रेत्य लभते गतिं अद्य यस्ततं यो न्नं मनिषिभ्यः प्रयच्छति स याति परमं स्थानं दुष्प्रा
पं यत्सुरैरपि ददाति यो न्नं सततं सम्संस्कृतं न तस्य लोकाः परिह मतेषमतानिशेः भीष्म उवाच
मत्राप्युदाहरंतीममितिहासं पुरातनं वटोर्भिदोश्च संवादं तन्मे शृणु समाहितः भिंदुः प्रयागे

१६६

न्यास्यचिरंनिष्टप्तःपोषितः तस्यशिष्योवटुर्न्नामपरिचर्यांचकारसः सपप्रच्छगुरुंतत्रक्षुत्क्षामंकरतं
मृषिं ॰ग्राख्याहिभगवन्मह्यंक्षुधाव्याधेस्तुवेदनां भिक्षुःउवाच शक्तिःशूलगदाचक्रैःखड्गतोमरसा
यकैः विभिन्नैर्वेदनायायास्यात्क्षुधयासापिनिर्जिता श्वासकासज्वराद्याद्यायेज्वरपस्मारसंभवाः व्या
धयोदुःसहास्सर्वेक्षुधयातेपिनिर्जिताः यथाहेमविचित्रांगोमुकुटीधृतकुंडलः क्षुधितोनविरा
जेतप्रेतवद्दृश्यतेनरः यथाभूमिगतोनागोयोशोषयंतिरवेःकराः शरीरस्थांस्तथाधातूनग्निर्जठरसं
भवः नस्पृशतितेनचाघ्राणिचक्षुषाननपश्यति दह्यतेवेपतेस्फुटोमुह्यतेचक्षुधार्दितः नपूर्वंदक्षि
णांवापिपश्चिमांनोत्तरांदिशं क्षुधाविष्टोभिजानातिदह्यतेचमुहुर्मुहुः मूकत्वंबधिरत्वंचस्तब्धां
गत्वंचपंगुतांशोचमूर्छश्रममर्यादंक्षुधासर्वंकरोतिहि जनकंजननीपुत्रंभार्यांदुहितरंतथा भ्रात
तरंबंधुवर्गंचहिंस्तेचक्षुधार्दितः नपूजयेत्पितॄन्सम्यग्गुरुंश्चनचदेवताः कार्यंकर्तुमशक्तस्य

दा॰ध॰ कथयाद्यमनोगतः एवंविधानिदुःखानिजायंतेदुःखयावदे। जायंतेविपरीतानितन्मेसेतानिपुत्रक
६७ वदरूवाच कथितानीतव्यानानदुःखायावेदनापरा महात्म्यमपिचान्नस्यश्रोतुमिच्छामितत्त्व
तः द्विजरूवाच अन्नात्परतरंलोकेनभूतंनभविष्यति अन्नमूलंजगत्सर्वमन्नेचैवप्रतिष्ठितं
पितरोदेवदैत्याश्चयक्षराक्षसकिन्नराः मनुष्याश्चपिशाचाश्चसर्वेह्यन्नमुपाश्रिताः भीष्मउवाच
तस्मात्सर्वप्रयत्नेनदद्यादन्नंयुधिष्ठिर अन्नदस्तत्क्षिमाप्नोतिशाश्वतींपरमांगतिं कन्यादानंवृषो
त्सर्गस्तीर्थसेवाश्रुतंव्रतं अन्नदानस्यसर्वाणिकलांनार्हंतिषोडशीं हस्त्यश्वरथदानानिमणि
रत्नवसूनिच अन्नदानस्यसर्वाणिकलांनार्हंतिषोडशीं अन्नात्प्राणःबलंतेजोह्यन्नाद्वीर्यंधृ
तिःस्मृतिः अन्नात्संभवतेवीजंतच्चैवान्नेनधार्यते पुंडरीकोश्वमेधाश्चवाजिपेयोमखस्तथा।
अग्निष्टोमस्त्विरात्रश्चयेचान्येविविधामखाः सर्वेप्यन्नात्प्रवर्तंतेराजन्यज्ञाःसविस्तरः स
र्वैपतनदीद्वीपासप्तसमुद्रावसुंधरा तेनदत्ताभवेद्योन्नंसम्यग्दद्याद्द्विजातिशः अन्नदानस्यमा
हात्म्यमुक्तंविस्तरेणमयानृप भीष्मउवाच देयमन्नंचतुर्थेभ्योयदस्मात्सिद्धयेद्विजः वदूर्कै ६७

पदेशेनकृषितेनान्नंदत्तंतदा तदान्नमपिकौंतेयकृषितेनप्रदोभव ब्रह्महत्यादिकंपापंमन्नदस्यप्रणश्य
ति किंतुज्ञातिवधोद्भूतंयेषांदारात्रेणजीविका अश्वमेधनिमित्तत्वाहृदस्यान्नंसदाक्षिणं ब्राह्मणेभ्योम
हाराजकृषितेभ्योविशेषतः सर्वदानानिदत्तानियज्ञःयज्ञाःसदक्षिणाः तर्पितादैवतास्तेनयोन्नदः न
सर्वदाभवेत् स्नातानाःसर्वतीर्थेषुसर्वतीर्थेष्वपंडितः कृषितायप्रयच्छेत्तुयोन्नंश्रद्धासमन्वितः ब्रा
ह्मणोभवनेनित्यंब्राह्मणासहमोदिते योदद्यान्निद्ध्यापुत्रःश्रद्धयान्नंदिनेदिने यःपठेदन्नदानंतुश्रा
द्धेश्रद्धासमन्वितः पितरस्तस्यतृप्यंतिदेवताश्चमहर्षयः इतिहाससमुच्चयेअन्नदानमाहात्म्ये
वदूषिकृसंवादोनामद्वाविंशोध्यायः २२ युधिष्ठिरउवाच तिलाःपवित्रमतुलंप्रवदंतिमहर्षयः
प्रदानेयत्फलंतेषांतन्मेब्रूहिपितामह भीष्मउवाच सर्वेषामेवदानानांतिलदानंपरंस्मृतं ब्रा
ह्मणस्यचसंवादंयमस्यचमहात्मनः मध्यदेशेमहाग्रामेब्राह्मणानांयुधिष्ठिर गंगायमुनयोर्म
ध्येयमुनस्यगिरेरधः पर्णशालेतिविख्याताबुसमित्कुशा विद्वांसस्तत्रभूयिष्ठाब्राह्मणाश्चावस
न्सदा अथप्राहयमःकिंचित्पुरुषंकृष्णपिंगलं रक्ताक्षमूर्ध्वरोमानंकाकजंघासनासिकं ॥ अन्नतार
सर्वपापहरंतद्धिपवित्रंस्वर्गमेवच अत्रैवोदाहरंतीममितिहासंपुरातनं

वत्सेहप

रा॰ मा॰ गच्छत्वंब्राह्मणग्रामंतत्रगत्वासमानय अगस्त्यगोत्रजंविप्रंनामतश्चापिदारुणं नचान्यमानयेथास्त्वं
६८ सगोत्रंनसपार्श्वतः तुल्यरूपंचतस्यैवतुल्यनामगुणंतथा सगत्वायमदूतस्तुप्रतिकूलंचकारह
तंमोहाद्वानयामासप्रतिविद्धोपमेनयः तंदृष्ट्वाद्विजमानीतंप्रतिपूज्ययमस्तथा प्रोवाचनीयतां
मेषत्तोन्यश्चानीयतामिति प्रत्युवाचाथतंविप्रोनि[illegible]मामीयनेनहि योमेकालोभवेच्छेषसंनिहे। र्विस्लो
सेतमेवच यमउवाच अकालविहितंनहिप्रापयामीहकंचन यत्रधर्ममधर्मंवातत्रजानामि
केवलं गच्छशीघ्रंत्वमद्यैवस्वगृहंद्विजसत्तम तद्वदस्वयथाकामंमेप्रियंकिंकरवाणिते ब्राह्मणउ
वाच यत्रकृत्वासमहत्पुण्यंस्याद्धिहितंमम प्रमाणंत्वंहिलोकानांधर्मःधर्मविनिर्णये यमउवा
च यमोयमश्चतिष्ठत्वाथैवोद्विजेतेनरः आत्मानुयामितोयेननस्यात्मैवयमःस्मृतः आनृशंस्यं।
त्वमसत्यमहिंसादममार्जवं दानंप्रसादोमाधुर्यमस्तेयंचयमादश यमैस्तुनियमैश्चैवयःकरोत्यात्म व
संयमं अहरहैवेहमांब्रह्मन्सब्रह्मलोकंसगच्छति शृणुधर्मरहस्यंत्वंयदन्यत्कथयामिते तिलाःपवि ६८

त्तमनुत्तमं मातेभूदत्र संशयः महर्षेः काश्यपस्यैते गोत्रेभ्योऽह्यभवन्पुरा तेनैव दिव्यं गत्वा भावं प्रदाने चोत्त
माः स्मृताः तिलाः मद्याचितव्यास्तु होतव्याश्च विधानतः विप्रेभ्यश्च प्रदातव्याः श्रेयस्कामैर्नरैरिह ।
माघमासे तु संप्राप्ते सूर्यपर्वदिने द्विजोत्तम गोमयेन मंडलं कृत्वा चतुरस्रं महामते नववस्त्रं समास्तीर्य कुसु
मैस्समन्वितं द्रोणमात्रास्तिलास्तत्र निधाय वसनोपरि पद्ममष्टदलं कृत्वा कर्णिकापरिशोभितं ।
निष्कत्रयेण स्वर्णस्य स्थापयेत्कर्णिकोपरि इंद्रनीलमहानीलमणिमुक्ताफलादिभिः शोभयेत्सुय
त्नाशक्त्या गन्धपुष्पादिभिस्तथा तैलप्रस्थेन पूर्णे प्रस्थं तु गव्यप्रस्थामतःपरं स्थापयेत्पार्श्वतस्तस्य
धान्यपात्राणि षोडश एवं विकृत्वायतनं पर्यन्ते तिलद्रोणमयं शुभं एकरात्रं द्विरात्रं वा त्रिरात्रं वा द्विजो
त्तम तिलाहारो भवेत्सर्वमुपवासं भवेदथ ततः स्वकायशुद्ध्यर्थं वासुदेवमनुस्मरेत् हिरण्यगर्भ
मस्मृतं भूगर्भं परतःपरं शंखचक्रगदापाणिपीतवाससमच्युतं श्रीवत्सांकं जगद्बीजं सर्वकारण
कारणं कविं पुराणं विश्वेशं पुंडरीकनिभेक्षणं आसीनं कर्णिकामध्ये सर्वशक्तिसमन्वितं ॥

ह॰ दु॰ कृतांजलिपुटोभूत्वानमस्कृत्यपुनःपुनः जितेंद्रियायशांतायप्रसन्नायात्मवेदिने रागद्वेषविहीनायवेश्म
६९ वायविशेषतः प्रीयतांमाधवोदेवइत्युक्त्वातमनुस्मरन् दद्यात्तिलमयंपद्मंशुचिर्भूत्वासमाहितः हिरण्यग
र्भदेवेशपद्मनाभजनार्दन हिरण्यकृत्गुणोदारसर्वरक्षामयेश्वर धनधान्यसमृद्धंचसर्वदुःखविवर्जि
तः कुरुमांपरमोदारभक्तोहमितिचिंतयन् इत्यंप्रसाद्यदेवेशंवासुदेवंसनातनं दद्यात्तिलमयंपद्मं
सर्वसंपत्समृद्धये एवंतिलमयंपद्मंयोददातिविधानतः सर्वसत्वसमाकीर्णंनिरयंसनपश्यति स्वयं
भवतिसत्यात्मा पितॄन्नथपितामहान् (इत्यंप्रसाद्यदेवेशंवासुदेवंसनातनं दद्यात्तिलमयंपद्मं) प्रपिता
महधर्मान्मातारयत्यखिलंकुलं धर्मार्थीधर्ममाप्नोतिधनार्थीविपुलंधनं (मोक्षार्थीमोक्षमाप्नोतिधा
न्यार्थीविपुलंधनं) मोक्षार्थीमोक्षमाप्नोतिनात्रकार्याविचारणा ब्रह्महामुच्यतेपापात्पितृघ्नोगुरु
तल्पगः सर्वपापरतोवापिमुच्यतेनात्रसंशयः इतिकंपितरः पुत्रान्पौत्रांस्तद्वंशसंभवान् अस्म
द्गोत्रोद्भवकश्चित्तिलपद्मंप्रदास्यति यस्तुराजाधनपतिः समृद्धोतीवधार्मिकः अश्वाराधादिव्यं विधि
नावस्त्रालंकारभूषितैः वाहनादिभिरन्यैश्चग्रामक्षेत्रादिभिस्तथा यत्फलंसमवाप्नोतितिल ६९

तिलपद्मस्य माहात्म्यं यस्यनेकफलदं स्मृतं २

नर

70

पद्मानुतोयिकं प्राप्नोति ब्राह्मणश्रेष्ठ नात्र कार्या विचारणा यस्त्वेवं विधिना दद्यात्तिलपद्मं च धार्मिकः ।
तस्य दानफलं यत्स्यात्तस्यान्तो नैव विद्यते वक्तुं शक्नोति पुरुषो न च वर्षशतैरपि तिलानित्यं प्रदातव्या यथा
शक्त्या द्विजोत्तम तिलदानात्सर्वकामानाप्नुवंति न संशयः कृष्णाजिने तिलान्कृत्वा सहिर्विमधुकांचनं ।
यः प्रयच्छति विप्राय सर्वपापैः प्रमुच्यते सर्वेषां सत्वानां च सततं देयं पानीयमेव वने ग्रामे वा नगरे वापि मार्गे
वा तोयवर्जिते यः कूपं कारयेत्तत्र स पुण्यगतिमाप्नुयात् एतत्सुदुर्लभतरमिह लोके परत्र च तस्मा
द्वापीश्च कूपांश्च तडागानि च कारयेत् सभाः प्रपाश्च वर्तव्या भूतानां हितकाम्यया अन्नं दत्वानुसंस्कृ
र्त्याविन्नेकृतमकल्मषं दधिमिश्रं घृतयुक्तं पायसं वा यथाविधि भोजयित्वा द्विजांश्चापि कररकान्पाक
मंडलून् सशीतसलिलोपेतान्सोपि स्वर्गमवाप्नुयात् वातवर्षातपत्राणं छत्रं दद्याद्द्विजातये सर्वव्याधि
रहितः श्रियं पुत्रांश्च विंदति गृहं चापि करणं वापि गृहं वापि परिच्छिदं वैवाहिकप्रदाने वा यो ददाति दयाप
रः विमानेन विचित्रेण किंकिणीजालमालिना महेंद्रभवनं याति सेव्यमानोप्सरोगणैः दृश्यमाना

स स्वर्गं व्रजते नरः तिलान्सुवर्णपानीयं दीपं मन्त्रप्रतिश्रयं सर्वान्स्वर्णं पिनः सैव दातव्यं हि प्रयत्नतः यद्यदिष्टतमं लोके
यच्चास्ति प्रियं ४

स्त्रि० यः काष्ठं प्रयच्छति ह्युपानहौ न तस्य ग्रीष्मतो दाहः कदाचिदपि विद्यते यानं चाश्वतरैर्युक्तं तस्य हेमम
७० यं शुभं उपतिष्ठति विशिष्टं सर्वरत्नविभूषिते यस्तापनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति सर्वार्थसिसिद्धिं ति नर
तेजस्वी चैव जायते हेमंते शिशिरे चैव सदाग्नीन्यः प्रयच्छति सर्वलोकप्रदीप्ताङ्गस्तस्य भोगतिमाप्नुया
त् चंदनागुरुधूपांश्च विप्रेभ्यो यः प्रयच्छति तांबूलवस्त्रं यश्चापि दद्यितं गृहे तत्तद्गुणवद्देयं तदेवा
क्षयमश्नुते भीष्म उवाच इत्युक्तो धर्मराजेन प्रीतात्मा स्वगृहं द्विजः आनीतो यमदूतेन यथोक्तं तच्च
कारसः तस्मात्त्वमपि राजेंद्र तिलदानपरो भव तिलेभ्यः प्राप्यते स्वर्गो धर्ममोदं तथैव च वासुदेवं स
मुद्दिश्य सर्वदानानि पार्थिव देयानि विप्रेभ्यः प्रयत्नेन दातव्यानि विशेषतः इदं महात्म्यं यमवाक्यनाहितं
तिलप्रदानस्य फलं निशम्य सः तिलप्रदानेन यघोस बंधव स्त्रिविष्टपं साधुजनेश्च पूजितः ॥
इतिहाससमुच्चये तिलप्रदानो नाम त्रयोविंशतितमोध्यायः २३ युधिष्ठिर उवाच ॥
अयं हि मनरो राजन् गां द्विजाय ददाति यः तस्य दानफलं यस्मात्तन्मे ब्रूहि पितामह भीष्म उवाच ॥ ७०

अपहृत्य नरो राजन् गां द्विजाय ददाति यः तस्य दानफलं नास्ति नरकं चैव गच्छति अत्रैवोदाहरंतीममितिहासं पु
रातनं वासुदेवस्य संवादं नृगस्य च महात्मनः निवसंति महाराज द्वारवत्यां हि यादवाः सिद्धैः सार्धं ये सु दे
वैश्च नरैः पुण्यकर्मभिः अदृश्यंत महाकूपः तृणवल्लीसमावृतः पुरातने ष्टका विद्धः पातालद्वद्दुर्गमः
तस्मिन्नेवंविधे कूपे महाद्भुतमवस्थितं कृकलासमपश्यंत द्वारिकावासिनो जनाः तस्य चोद्धरणे यत्नं
चक्रुस्ते चाप्यनेकशः रज्जुभिः सुमहद्भिश्च तं वद्धा पर्वतोपमं नाशक्नुवन्समुद्धर्तुं ततः कृष्णेन्यवेद
यन् तत्राजगाम च तदा भगवान्देवकीसुतः उद्धारयामास च तं कृकलासं सुरेश्वरः ४ नृगाख्यं मान्या
नमुवाच भूपं पुरातनं यज्ञसहस्रयाजिनं तथाब्रुवानं तमुवाच माधवः शुभं त्वया कर्मकृतं न पापं १ क
थं भवान्दुर्गतिमीदृशीं गतो नराधिपाचक्ष्व किमेतदीदृशं सहस्रसंख्यानि युतं तथा युतं गवां च कोटीश
तमर्बुदं तम् २ त्वया पुरा दत्तमितीह शुश्रुम कृतं न्महादानफलं गतं क्व नृग उवाच द्विजस्य गोः प
रिभ्रष्टा समेता मम गोधनैः साज्ञानता मया दत्ता विप्रस्यान्यस्य माधव सोपश्यन्मार्गमानस्तां गां
त

सर्वान्देवेनन्ददसक्रुकः ९५कक्रतरोप्र
पत्नाजर्न ६

रा॰मा परिगृह्येद्विजः ममेयमितिनिश्चितोवाचश्चयमेवस्यसाभवत् अन्योप्युवाचराजन्मेगौर्दत्तादक्षिणात्विति
७५ ताबुभौसमनुप्राप्तौविवदंतौममांतिकं भवान्दातामभवान्हर्तामामेवंसमसूचतुः ततःसहस्रसंख्या
नगवांविनिमयेनसः मह्यंनायाचितःपूर्वंसतुमामब्रवी दिदं धान्याधेनुःवहुक्षीरातरुणीपुष्टी
लंसपुत्रा नत्याज्याप्राज्ञामयात्यक्तुमित्युक्त्वाम्ययोद्विजः ततस्तमपरंविप्रंययाचेप्रीतिपूर्वकं।
गवांसहस्रमेतस्यांममत्यांब्राह्मणाभ्युत्तां ब्राह्मणउवाच नराजन्प्रतिगृह्णामिप्रशक्तोहंस्वसमा
र्गणे सैवगौर्दीयतामद्यमित्युक्त्वासोपिनिर्ययौ नृगउवाच परस्परेविवादेनस्पर्धाक्रांतौद्विजोत्त
मौ अव्रगत्यचमांकुत्वप्रयातौस्वगृहंप्रति एतस्मिन्नेवकालेतुनोदितःकालकर्मणा यमलोके
महंप्राप्तोधर्मराजमुपागतः ततःसंपूजयित्वामांप्रोवाचभगवान्यमः नांतःसंख्यास्तिराजेंस्तवपुण्य मा
कर्मणः यावंतःसिकितालोकेयावंतोदिवितारकाः यावंतोवृष्टिधाराश्चतावद्दानंभवाद्दृशौ अ
लिचैकंकृतंपापमज्ञानात्त्वदपित्वया तंभुंक्ष्वपापपूर्वंवापश्चाद्वापियदिच्छसि शुभाशुभानांरा ७५

जैंद्गनास्तिनाशोहिकर्मणां अवश्यमवशल्तेषां भोक्तव्यं गुरुभैर्फलं नसकश्चिदुपायोस्ति देवो वा मा
नुषोपि वा उपभोगाद्दृतेयेनकर्मगच्छेत्क्षयंनृणां प्रायःश्चित्तमृषिप्रोक्तंनत्रैवतुभ्रूततेयदि नसन्तन्नेव
तत्पापंविनाशमुपगच्छति अक्षयेभवतापुण्येनचास्तिक्षयकारणं धर्मभुक्तांतनंपूर्वंपश्चात्पापंचभोक्ष्य
से नृगउवाच प्राक्पापमुपभोग्यामि पश्चात्पुण्यमितिप्रभो चरणमात्रमपित्वेतन्ममचेत्तायतेसु
भम् भोक्ष्यामिपापमेवाहंसर्वसज्जनगर्हितम् धर्मराजंब्रुवन्नेवंपतितोस्मिमहीतले अश्रौषंचह
तस्याहंयमस्योच्चैःप्रजल्पितं वासुदेवःसमुद्धर्तापापांतेभवितानव कूपेधोमुखमात्मानमपश्यं
पतितंततः तिर्यग्योनिमनुप्राप्तंनचमेविस्मृतास्मृतिः दानंसत्त्वनिवृत्तिस्स्यात्परसत्त्वोपपादनं
विपरीतंततःकृत्वापश्यमांपतितंविभो त्वयाहंतारितोह्यद्यदेवदेवजगत्पते दामोदरहृषीकेशप
द्मनाभजनार्दन नारायणसहस्राक्षसर्वलोकपरायण अनुज्ञांदेहिमेकृष्णगच्छामित्रिदिवालयं
श्रीवासुदेवउवाच ब्रह्मण्यस्त्वंनहर्तव्यंपुरुषेणकदाचन ब्राह्मणस्वंहृतंहन्तिनृगंब्राह्मणगोरि

हे·कृ· व श्रोत्रियेगवांचयोदद्याद्वैकामपिहरेत्स्वयः वरमेकापिनहर्त्तानतुदत्तंगवांशतं ब्रह्मस्वेनतुपुष्टानि
७२ वाहिनानिबलानिच विनाशमायांत्युगच्छंतिशारन्मेघइवांबरे महानपिदहन्वन्हिःसलिले
नोपशाम्यति ब्राह्मणस्यचदहतःशमोपायोनविद्यते ब्रह्मस्वंप्रणयाद्भुक्तंदहत्यासप्तमंकुलं
विविधेननतुभुक्तंहिदशपूर्वान्दशापरान् षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच ब्रह्मस्वहा
रीपुरुषोविष्टायांजायतेक्रिमिः अश्मानंपिहिपायेनलोहंचाजरयेन्नरः ननुकश्चिदुपायो
स्तिब्रह्मस्वंयेनजीर्यते ब्रह्मस्वाद्दुर्जरतरंनान्यल्लोकेस्तिंचन अप्रमेयकमभोज्यंचविषंहालाहलो
पमं हालाहलादपिविषाद्ब्रह्मस्वंकष्टमुच्यते विषमेकाकिनंहंतिब्रह्मस्वंपुत्रपौत्रकं वनेवनततृणाग्निर्द ग्धिं
हमूलानिरक्षति कुलंसमूलंदहतिब्रह्मस्वेनैवपावकः तस्माद्दावाग्निवद्धाहीविषवच्चसुदुर्जरे
ब्रह्मस्वंनापिहर्त्तव्यंनरेणात्महितैषिणा भीष्मउवाच इत्युक्त्वापुंडरीकाक्षोभगवान्भुवनेश्वरः
पावनःसर्वलोकानांययौद्वारवतींपुरीम् साधुभिःसंगमःपार्थकदाचिन्निष्फलोभवेत् किमु ७२

नोनरकाद्वाजानरगस्त्वापुरमागमात् साधूनां दर्शनंस्पर्शः कीर्तनं स्मरणंतथा तीर्थानामिवपुण्यानां
सर्वमेवहिपावनं एतत्ज्ञात्वात्वयास्तैतः सदोपास्याः प्रयत्नतः ब्रह्मस्वंनचहर्तव्यंयदीच्छसिपरांगतिं
स्वमेवदयात्सुपरीक्ष्यधर्मविधिरक्षदानंहिपरत्रनाशनं द्विजोत्तमस्वंहरतःसुदुर्मतेविशेषेणतःकाष्ठि
गतिंविचिंतय ॥ इतिहाससमुच्चयेनगोपाख्यानंनामचतुर्विंशोतितमोध्यायः २४ ॥
युधिष्ठिरउवाच साधुभिस्सहसंवासेयेगुणाःपरिकीर्तिताः महाभागवतांश्रेष्ठतन्मेब्रूहिपितामह।
भीष्मउवाच हंतेतेकथयिष्यामिचेतिहासंपुरातनं नकुष्मस्यचसंवादंमहर्षेश्च्यवनस्यच भार्ग न
वश्च्यवनोनामममहर्षिसमहातपः तुपवासकृतारंभोवभूवकिलभारत निहत्यकामंक्रोधंच द्रोहं
मोहंमदंतथा गंगायमुनयोर्मध्येविवेशसलिलाश्रयं तंगंगायमुनाचैवसरितश्चापगास्तथा प्रति
क्षिणंस्पर्शंचकुर्वन्तचैनंप्रत्यपीडयन् तत्रास्यावसतःकालःसमतीतोमहांस्तथा परेणध्यानयो
गेनस्थाणुभूतस्यतिष्ठतः ततःकदाचित्तंदेशमगमन्मत्स्यजीविनः प्रसार्यसुमहज्जालंमत्स्यो

स्तु शाखिरेवलात् अथ ते सद्वंस्ते सु निषादा बलदर्पिता: तस्मादुत्तारयामासुः सलिलान्मत्स्यनंदनं तं दृष्ट्वा
दित्यसंकाशं केवर्ती भयपीडिता: शिरोभिः प्रणिपत्योच्चैरिदं वचनमब्रुवन् केवर्ता ऊवाच अज्ञाना
त्कृतपापानामस्माकं क्षंतुमर्हसि किं वा कुर्मः प्रियं ते यन्नदाज्ञापय महाव्रत भीष्म उवाच स मुनिस्तन्म
हद्दृष्ट्वा मत्स्यानां कदनं कृतं कृपया परया विष्टस्तानुवाच सुदुःखितः च्यवन उवाच मरणं विक्रियं
वापि मत्स्येयां स्याम्यहं सह संवासाच्चोत्सहे त्यक्तुं दीनानेतान्सुदुःखितान् दुःखार्तानीहमूतानिव
प्रपन्नदुःखैः पृथग्विधैः केवलात्मसुखे [illegible]यः केन्द्र शेसनरस्ततः अहो सर्वेषु कारुण्ये न हि स्वार्थं वहि
ष्कृतं ज्ञानिनामपि यच्छ्रेतः केवलात्महितो ह्ययं ज्ञानिनोपि यदा स्वार्थमाश्रित्य ध्यानमास्थिताः।
सत्त्वाः संसारदुःखार्ताः कं यान्ति शरणं तदा को नु तस्याप्युपायो हि येनाहं दुःखितात्मनां अन्तः प्रविश्य
सत्त्वानां भवेयं दुःखसंविदा अहो मीना स्फुरंत्येते लुठंति च तथा परे बलिनोपि महाकायाः सूर्यांशु
परिपीडिताः दृष्ट्वान्धबधिरव्यंगानन्नाथान्रोगिणस्तथा दयां न जायते यस्य स प्रोक्तो मूढचेतनः। ७३

प्राणसंशयमापन्नां प्राणिनोविनिकृन्ततः योनरक्षतिनिःशङ्कःसन्नरःपापंगतिमाप्नुयात् अपहृत्यार्तिसंता
नात्सुखंयदुपजायते तस्यस्वर्गोपवर्गोवाकलांनार्हतिषोडशीं तस्मान्नेतानहंदीनांल्लक्षेमीनांदु
दुःखितान् ब्राह्मणोपिपदंयासेकिंपुनास्त्रिदशालयं नकरिष्येचयुष्माकंमाशाःक्षुद्रकदाच
न निवेदयतमांराज्ञे सचमूल्यंप्रदास्यति भीष्मउवाच ॰ एवंनिशम्यवचनंनिषादाजातसंभ्र
माः गत्वाराज्ञेयतत्सर्वंनहुषायन्यवेदयन् नहुषोपितनःश्रुत्वाविस्मयाविष्टचेतनः कोयमत्य
द्भुताकारोजलेवासमकल्पयत् इतिहृचिन्त्यधर्मात्माधर्मभक्तिसमन्वितः भयेनचसमाविष्टोमुनेःप्र
वरशापकया विसृज्यमेनांतत्रैवराजालयुपरिच्छदः त्वरितःप्रययौतत्रसहामात्यपुरोहितैः तंदृष्ट्वा
सूर्यसंकाशंच्यवनंसंश्रितव्रतं ज्ञात्वाभार्गवमेकाग्रंध्यानयोगपरायणं तंप्रपूजयित्वाविधिवद्देवक
ल्पनरेश्वरं प्रोवाचभगवन्ब्रूहिकिंकरोमितवाज्ञया च्यवनउवाच श्रमेणमहताविष्टाःकेवर्तादुः
खजीविनः ममसूल्यंप्रयच्छैभ्योयथावद्राजसत्तम यथाम्हल्यप्रदानेनमत्स्यसाधर्म्यमास्थितं

मा

अ॰प॰ भ्योमोचयमांमीनामरिष्येवाततोन्यथा यदामूल्यप्रदानेनकरिष्यात्ममोचनं ततोमीनांश्चर
७४ न्तामितन्मेमनसिनिश्चयं नहुषउवाच सहस्राणांशतंमूल्यंनिषादेभ्यःप्रदीयतां निष्क्रया
र्थंभगवतोयदाहभृगुनंदनः च्यवनउवाच नाहंशतसहस्रेणप्रार्थनीयस्त्वयानृप सदृशंदी
यतांमूल्यममात्यैःपरिचिंतय नहुषउवाच कोटीःप्रदीयतांमूल्यंनिषादेभ्योद्विजोत्तम यदेत
दपिनोमूल्यंततोभूयःप्रदीयतां च्यवनउवाच नाहमर्होनवाकोटिमधिकंवापिपार्थिव सदृ
शंदीयतांमूल्यंचिंतयित्वाद्विजैःसह आत्ममौल्यंनवक्ष्येहंनतंलोकप्रशंसति तस्मान्नाहंप्रव
क्ष्यामिनचात्मस्तुतिमुद्वहे नहुषउवाच अर्धराज्यंनिषादानांनिष्क्रियार्थंप्रदीयतां सदृ
शंदीयतांमूल्यंचिंतयत्वर्षिभिःसह भीष्मउवाच महर्षेर्वचनंश्रुत्वानहुषोदुःखितोभृशं।
चिंतयामासप्रोकांतःसहामात्यैपुरोहितैः गत्वाकश्चिद्दिवस्तत्रगविजातोजातोमहातपः ७४

प्रोवाचनहुषंमाभैः तोषयिष्याम्यहंमुनिं नहुषउवाच ब्रवीतुभगवान्मूल्यंमुनेरस्यमहात्मनः प
रित्रायस्वमामस्माद्विषयंचकुलंचमे हन्याद्द्विजोहिसंक्रुद्धस्त्रैलोक्यमपिमेश्वरं किंपुनर्मांतपो
हीनंबाहुवीर्यपरायणं गविजातउवाच अनर्घ्याहिमहाराज जगत्पूज्याद्विजोत्तमाः गावश्चदेव्या
श्चतस्माद्गौर्मूल्यमस्यप्रदीयतां भीष्मउवाच तच्छ्रुत्वावचनंराजासहामात्यपुरोहितैः हर्षे
णमहताविप्रःप्रोवाचेदंमहामुनिं नहुषउवाच उत्तिष्ठोत्तिष्ठविप्रर्षेगवाक्रीतोसिभार्गव एतन्मू
ल्यमहंमन्येतवधर्मभृतांवर च्यवनउवाच उत्तिष्ठाम्येषराजेंद्रगवाक्रीतोस्मितेनघ गोभि
स्तुल्यंनपश्यामिपवित्रंपरमंभुवि गावःप्रदक्षिणीकार्यावंदनीयाश्चनित्यशः मंगल्यायतनंदेव्यःसृ
ष्टास्त्वेताःस्वयंभुवा अग्न्यागाराणिविप्राणांदेवतायतनानिच शुध्यंतेशकृतायासांकिंभूतमधिकंत
तः गोमूत्रंगोमयंक्षीरंदधिसर्पिस्तथैवच गवांपंचपवित्राणिपुनंतिसकलंजगत् गावोममाग्रतोनित्यं

इ'हा
७५

गावस्तिष्ठंतु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहं एतन्नरो जपन्मंत्रं त्रिसंध्यं नियतः शुचिः ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति शीतवातातपसहं यः ऊर्यांश्चरणं गवां सर्वदुःखविनिर्मु
क्तः सुखमत्यंतमश्नुते वासं जलं परगवे स्नात्वं दयानुयः सदा अकृत्वा स्वमाहारं स्वर्गलोकं स प
गच्छति तेनाग्रयोऽह्नतः सम्पाविपतरः स्थापितर्षितः देवाश्च पूजितस्तस्मै यो ददाति गवाह्निकं
श्राद्धे गावो हि यत्तस्य मध्ये चांते च पार्थिव। चरंति ताहि देवानां क्षीरात्प्यमम्नंतं सदा तस्मा
द्गावः प्रदातव्याः पूजनीयाश्च नित्यशः स्वर्गस्य जंगमान्येतां सोपानानीव निर्मितः भीष्म उ
वाच एतच्छ्रुत्वा निषादास्ते गवां माहात्म्यमुत्तमं प्रतिपत्य महात्मानं ततस्तमृषिमब्रुवन् निषादोवाच
संभाषो दर्शनं स्पर्शः कीर्तनं स्मरणं तथा पावनानि किलैतानि साधूनां मिति सुश्रुमाः संभाषो दर्श
नं चैव महात्मा मिहत्वंत्वया प्रसीद भगवंतस्मान्नौ रैषा प्रतिगृह्यतां च्यवन उवाच एषवः ७५

।सी

भीष्म उवाच एवं तु जानिषादास्ते गंगाया महात्म्यमुत्तमम् प्रीता पत्य महात्मानं ततो तेर

प्रतिहृष्टान्मिगासेनांमुक्तकिल्विषाः निषादा गच्छन्तस्स्वर्गंमत्स्यैस्सह जलोद्भवैः यन्मया हतं किंचि
न्मनोवाक्कायिकर्मभिः दुःखाही नास्ततस्तेन सर्वे संतुसुखान्विताः तान्दृष्ट्वा व्रजतः स्वर्गं समत्स्यान्जाल
जीविनः सामात्यश्च्यवनस्तत्र पौ विस्मयं परमं गतः राजोवाच सर्वैः श्रेयोर्थिभिः सेनः पुन्यतीर्थकलो
पमाः तपोयासनयोगोपि न तेषां निष्फलं भवेत् साधूनां दर्शनं पुण्यं जीर्थभूता हि साधवः काले
न फलते तीर्थं सद्यस्साधुसमागमः अथर्षिश्च्यवनो धीमान्गाविजानो महातपः वरांस्त्वं चयथेष्टान्यो
छंदयामास तं नृपं ततः संवरयामास धर्मे बुद्धिं सुदुर्लभां तथेति चोक्त्वा तौ प्रीतौ तं नृपं प्रशशंसतुः अ
होधन्योसि राजेंद्र यत्ते धर्मे वरो मतः धर्मधीरदुर्लभा पुंसां विशेषेण महीक्षितां ध्रुवं राज्यं न्मदो राज्या
मदो मोहस्ततो भवः मोहाद्ध्रुवश्च नरको राज्यं निंदंत्यतो बुधः राज्यं हि बहु मन्यंते नरा विषयलोल
ती पाः मनीषिणस्तु पश्यंति न देवनरको परं तस्माल्लोकद्वयं ध्वंसीन कर्तव्यो मदस्त्वया यदीच्छसि म
हाराज शाश्वतीं गतिमात्मनः किंतु लोकद्वयं ध्वंसीमदः परमदारुणः भविष्यति महाराजन्तवैनै
श्रीसूत उवाच तत्स्तेन प्रसादेन महर्षेर्मत्स्यैस्सार्ध्विनात्मनः निषादास्तेन वाक्येन सह मत्स्यैर्दिवं गताः ८

शां.ध. नात्रकर्हिचित् अहोविमुच्यसेराजन्प्रसादादावयोर्ध्रुवं यस्मात्पार्थिवान्भूपधर्मेबुद्धिंसुदुर्लभां ।
७६ भीष्मउवाच इत्युक्त्वातौमहात्मानौजग्मतुस्स्वमाश्रमं नहुषोपिवरंलब्ध्वाप्रहृष्टःप्रविशत्पुरीं ॥ श्री
एतत्कथितंराजन्वैगुणाःसन्तसमागमे महात्म्यंचापितुगवांकिंभूयःश्रोतुमिच्छसि ॥ ॥
इतिहाससमुच्चयेच्यवननहुषसंवादोनामपंचविंशतितमोध्यायः २५ युधिष्ठिरउवाच ॥
मानसानीहतीर्थानिप्रशंसन्तिमहर्षयः तान्मेकुरुशार्दूलयथावद्वक्तुमर्हसि भीष्मउवाच ॥
तीर्थ अत्रैवोदाहरन्तीममितिहासंपुरातनं जनकस्यचसंवादंमहर्षेर्लोमशस्यच ऋषिःपरमधर्मात्मा
ध्यानयोगपरायणः तपस्वीसत्यसंपन्नोज्ञानसंछिन्नसंशयः तीर्थयात्रामनुचरंल्लोमशोनामना
मतः कदाचित्प्राप्तवान्राजनजनकस्यनिवेशनं तंदृष्ट्वाजनकोराजालोमशंसमुपस्थितं पूजयि
त्वायथान्यायंतमासीनमुपाविशत् ततःस्वावसरंलब्ध्वाप्रणिपत्यतपोधनं पृष्टवानिद
मेवार्थीयन्मांत्वंपरिपृच्छसि जनकउवाच मानसानीहतीर्थानिप्रशंसन्तिविपश्चितः विस्तरे ७६

णमहाप्राज्ञ तानि मे वक्तुमर्हसि लोमश उवाच शृणु तीर्थानि गदतो मानसानि ममानघ येषु स
म्यङ्नरः स्नात्वा प्रयाति परमां गतिं ज्ञानं तीर्थं क्षमा तीर्थं तीर्थमिंद्रियनिग्रहः सर्वभूतदया ती
र्थमहिंसा तीर्थमुच्यते अस्तेयं तु परं तीर्थमद्रोहस्तीर्थमुच्यते दानं तीर्थं तपस्तीर्थं सत्यं तीर्थं तथा
र्जवं ब्रह्मचर्यं परं तीर्थं संतोषस्तीर्थमुच्यते श्रद्धा तीर्थं धृतिस्तीर्थं दमस्तीर्थमुदाहृतं तीर्थानाम
पि यत्तीर्थं विशुद्धिर्मनसः परा न जलाप्लुतदेहस्य स्नानमित्यभिधीयते स स्नातो यो दमस्नातः
स तु शुद्धमनोमलः यो लुब्धः पिशुनः क्रूरो नास्तिको विषयात्मकः सर्वतीर्थेष्वपि स्नातो मलिनो मलि
न एव सः न शरीरमलत्यागान्नरो भवति निर्मलः विषयेष्वतिसंरागो मानसो मल उच्यते ते
ष्वेव च विरागस्तु नैर्मल्यं समुदाहृतं चित्तमंतर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति शतशोपि जलैर्धौत
सुराभांडमिवाशुचि दानमिज्या तपः शौचं तीर्थसेवा श्रुतं तथा सर्वाण्येतानि तीर्थानि यदि भा
वो हि निर्मलः निगृहीतेंद्रियग्रामो यत्र यत्र वसेन्नरः तत्र तत्र कुलं देवं नैमिषं पुष्करं तथा ॥

नान्य स्नानात्परो लोके शुद्धमाप्नोति सर्वशः ज्ञानेद्वकेनयः स्नातः स स्नातः
पंडितैः स्मृतः ५

हं स
७१
स्नानहृदेप्यौंजलेरागद्वेषमलापहे यस्तुतिमानसेतीर्थेसयातिपरमांगतिं येभजंतिजगद्योनिं
वासुदेवंमहेश्वरं नतेभ्योविद्यतेतीर्थमधिकंराजसत्तमः यत्रभागवतस्नानंकुर्वंतिविमलाश
याः तत्तीर्थमधिकंविद्धिसर्वपापप्रनाशनं यत्ररागादिरहितावासुदेवपरायनाः वसंतिपुण्य
कर्माणस्तत्तेत्रमधिकंस्मृतं वसंतिवैस्नवायत्रतच्चित्तास्तत्परायणाः तत्रसन्निहितोविस्नुर्नृपतेना
त्रसंशयः नसुगंधैर्नीजुलेपैर्नैवपुष्पैर्मनोहरैः सान्निध्यंकुरुतेविस्नुर्यत्रसंन्निनवैस्नवाः व
लिभिस्तोपहारैश्चनृत्यगीतादिभिस्तथा नित्यमाराध्यमानोपितत्रविस्नुर्नहृष्यति यत्रैतेमहा
भागावैस्नवावीतकल्मषाः पुनंतिसकलांल्लोकांस्तत्तीर्थमधिकंततः श्वपचोवाभगवद्भक्तोनिषा
दःश्वपचस्तथा वीक्ष्यतेयोतिसामान्यात्सयातिनरकंनरः तस्माद्विस्नुप्रसादायवैस्नवान्परि
तोषयेत् प्रसादसुमुखोविस्नुस्तेनैवास्यान्नसंशयः एतत्तेकथितंराजन्मानसंतीर्थलक्षणं
भौमानामपितीर्थानांपुण्यत्वेकारणंशृणु यथाशरीरस्योद्देशाःकेचिन्मेध्यतमाःस्मृताः ।७७

78

प्रभावादद्भुताद्भूमेः सलिलस्यचतेजसः परिग्रहान्मुनीनांचतीर्थानांपुण्यतास्मृता तस्माद्भौमे
षुतीर्थेषुमानसेषुचनित्यशः उभयेष्वपियःस्नातिसयातिपरमांगतिं भीष्मउवाच इतीरमुक्त्वा
नृपतिंमुक्तोमुनिःर्यथागतंसप्रययौमहातपाः तथैवकृत्वाजनकोमहामतिःप्रयातवान्सिद्धि
मतोन्यदुर्लभां नचैवतीर्थानिभवंतिसिद्धयेनचैवदानंनतपोनसत्क्रिया यदाप्रसन्नंहृदयंसु
निर्मलंतदास्यसर्वाणिभवंतिचान्यथा इतिहाससमुच्चयेमानसीतीर्थयात्रानामषड्विंशतितमो
ध्यायः २६ युधिष्ठिरउवाच अहत्वाब्राह्मणंयेनकर्मणाब्रह्महाभवेत् एतन्मेपृच्छतस्तातयथाव
द्वक्तुमर्हसि भीष्मउवाच इदमर्थंमयापृष्टःकृष्णद्वैपायनोमुनिः यदसौकथयामासतन्मेनिगदतः
शृणु ब्राह्मणंस्वयमाहूय[illegible]याचमानमकिंचनं पश्चान्नास्तीतियोब्रूयात्तमाहुर्ब्रह्मघातकं अधर्म
निरतोमूढोमिथ्यायोवैद्विजातिषु दृष्ट्वान्मर्माणिनिकृंतंशोकंतंविद्याब्रह्मघातकं आत्मजांगुणसंपन्नांहे
मेतीसदृशेवरे नप्रयच्छतियःकन्यांतंविद्याद्ब्रह्मघातिकं न्यायेनोपार्जितांवृत्तिंब्राह्मणस्यहरे

गोकुलस्य च यातस्य जन्त्वार्थमभिधावतः । तन्त्यादयति यो विघ्नं तं विद्याद्ब्रह्मघातकं ।
तुयः स्वाध्यायवन्तं च युक्तास्यतं विद्याद्ब्रह्मघातकं । यं गोरं यस्य दीनस्य व्याधितस्य जनस्य च हरेत यो वै स
वेस्वं तं विद्याद्ब्रह्मघातकं यः प्रसिद्धिं स्मृतिं सम्यक् शास्त्रं वा मुनिभिः कृतं दूषयत्यनभिज्ञानस्तं
विद्याद्ब्रह्मघातिकं नास्तिको भिन्नमर्यादो देवब्रह्मस्वहारकः धर्मनिंदापरश्चैव तं विद्याब्रह्मघा
तकं ये दूषयति संमोहाद्ब्रह्मदेवं जगत्पतिं सर्वलोकैककर्तारं तं विद्याब्रह्मघातकं माधवं परि
रक्तं तं सृष्टिसंहारकारकं येनार्चयति पापात्मा तं विद्याद्ब्रह्मघातकं दुपासनं मदेहानां द्विजा
नां भोक्तुमिच्छतां विघ्नमाचरते यस्तं तं विद्याद्ब्रह्मघातकं साक्षीदृष्टस्य यः प्रश्नात् जानमानो
न्यथा वदेत् लोभाद्द्वेषाद्भयाद्वापि तं विद्याब्रह्मघातकं वने भ्ने तृणहारीन् प्राणिनो न पराधि
नः हंतुमिच्छति यो दीनां तं विद्याद्ब्रह्मघातकं पिशुनो यश्च लोकानां रंध्रान्वेषणतत्परः । उद्वेज
नकृताक्रूरस्तं विद्याद्ब्रह्मघातकं गोव्रजे वा धने वापि ग्रामे वा नगरेपि वा यो ग्निं समुत्सृजेत्क्रू
रस्तं विद्याद्ब्रह्मघातकं मातरं पितरं वापि विकलं नेत्रदुर्बलं न चैवाद्भरते पुत्रस्तं विद्याद्ब्रह्मघा

तकं येतुर्वंतीहग्गंतॄनांप्रति कूलेविहिंसकः ब्रह्महत्यांकृत्वापिब्रह्महत्यामवाप्नुयुः गच्छ
न्तोपिश्वन्तोपिजाग्रतःस्वपनोपिवा यन्नमूत्नहितार्थायतत्यशोरिक्वेष्टितं एतत्तेसर्वमाख्या
तंमयातत्त्वेनभारत अहत्वेवयथाविप्रंब्रह्महापुरुषोभवेत् युधिष्ठिरउवाच ब्राह्मणे
भ्यःप्रतिश्रुत्यायेनरालोभमोहिताः नप्रयच्छंतितेप्रीत्यकेभवंतिपितामह भीष्मउवाच
८ योनयात्प्रतिश्रुत्यस्वल्पंवायदिवावहु आशास्तस्यहतास्तेतिक्लीवस्येवप्रजाः जन्मप्र
भृतियत्किंचित्पितेनसत्यान्यस्यकृतंकृत सर्वंगच्छतितत्तस्ययेनाशाविफलीकृता ब्राह्मणोह्याशा
याशाक्षोवीत्यनेपृथिवीपते हसमद्रिर्यथादीप्तःपावकःसहिजस्त्रतः अयंनिरीक्षतेकुद्ध
आशायापरयानया निर्दहेत्सहितंपापंकक्षंवह्निस्तमुंथा अत्रैवोदाहरंतीममितिहासं
पुरातनं स्रगालस्यचसंवादंवानरस्यचभारत सूयतेचपुराराजन्वेश्यौधनसमन्वितौ ।
एकस्यामेवसंजातौनगर्यांमहतांकुले नैसत्वायोऽपराख्यात्तामानुष्यत्वेपरस्परं ॥

ॐन्येजातमनुप्राप्तौसृगालीवानरौनृप ततोमर्नत्तोवादंतंसृगालंवीक्ष्यवानरः श्मशानमध्ये
७२ प्रोवाचपूर्वजातिमनुस्मरन् वानरउवाच किंत्वयापातकंकर्मकृतंपूर्वंसुदारुणं येनश्म
शानमध्येत्तकान्मत्स्यसेहदेहिनः सृगालउवाच ब्राह्मणेभ्यः प्रतिश्रुत्यनप्रदत्तंमयापु
रा तेनसृगालतांप्राप्तोगताम्हमेतद्यामहं एतन्मयोत्तेकथितंसृगालोहंयथाभवन्
त्वंचवानरतांप्राप्तः कर्मणायेनतद्वद वानरउवाच पारक्यानिपुरालोभात्फलान्यपहृ
तानिमे तेनाहंस्तेयदोषेण वानरत्वंसमुपागतः भीष्मउवाच एवंतौकथयित्वातुकर्म
दोषंपरस्परं सृगालोवानरश्चैवप्रतियातौयथागतं यस्मात्तस्मात्परद्रव्यमपहृत्यबलान्न
रः अवश्यंयातितिर्यक्त्वंमानेभूदत्रसंशयः तस्मात्प्रतिश्रुतंयत्स्याद्देयंविप्रस्यपार्थि
व परत्वंचनहर्तव्यंयदीच्छसिपरांगतिं इतिनिशम्ययुधिष्ठिरद्विजवरेभ्यविरुद्धमाच ७२
र अपिनरकप्रयात्तनायपात्तकिनामिहदुर्गतिं इतिहाससमुच्चयेब्रह्महत्यांविपिस्व

गालवानरसंवादोनामसप्तविंशोध्यायः २७ युधिष्ठिरउवाच ऋषयोब्राह्मणादेवाः प्रशंसंतिपि
तामह अहिंसालक्षणंधर्मंवेदप्रमाणदर्शनात् कर्मणामनुजाकुर्वन्हिंसांपार्थिवसत्तमः वाचा
चमनसाचैवकथंदुःखात्प्रमुच्यते प्रायशःपुरुषालोकेनृशंसाप्राणिहिंसकाः मांसेषुगृद्धाशंतेरो द
द्भवस्तोगणैरव नाःस्तूपान्विविधाहारान्शाकानिपराणिच नेच्छंतीरविकारस्वापयेच्छंतियथामिषं
नान्यत्स्वादुतरंतस्मात्किंचिदस्तीतितेविदुः नोजकांतिकरंचैवनरोगार्तिहरंतथा तस्मायेभक्षणेदो
षामुनिभिःपरिकीर्तिताः वर्जनेपिगुणास्तेवैवक्तुमर्हसितान्मम भीष्मउवाच अनीवखलुधोरःसो व्या
लोनराविषयलोलुपः सर्वेदोषकरंमांसमूढाःपश्यंतियेगुणान् आस्वाद्यसाहिसर्वस्यजिह्वाग्रेनक्षणं
संगमः कंठनालमतीतंचसर्वंचैवाशनंसमं यदन्नंभुज्यतेस्वादुकष्टंकदशनंचयत् तयोःसंप्रा
प्तयोःकोष्ठेविपाकस्सदृशःस्मृतः रसनाशनसंयोगक्षणंसौख्यविमोहिताः बहुशोनयथाम्री
नाविनाशंयांतिबालिशाः नमांसमायुषोहेतुर्नारोग्यस्यनचौजसः दैवंकारणमेतेषांसातादेत

द्विदृश्यते मांसाशीनोहि दृश्यंतेरोगार्त्ताभृशदुःखिताः अमांसादाश्चनीरोगाबलवंतःसुख
८० स्थिताः किंस्वादुदुःखानांविज्ञानालिकाविषयात्मका भक्ष्यंतिनरामांसंनृशंसाराक्षसाइव येभक्ष
यंतिमांसानिसत्वानांजीवितैषिणां भक्ष्यंतेपितैस्सर्वैरितिव्यासाब्रवीत्स्वयं मांसंभक्षयितामुत्रयस्य
मांसमिहाद्म्यहं एतन्मांसस्यमांसत्वंप्रवदंतिविपश्चितः नहिमांसंतृणात्काष्ठादुपलाद्वापिजायते
हत्वाजंतुंभवेन्मांसंतस्मान्मांसंपरित्यजेत् एतदेवाहिपर्याप्तंमांसस्यपरिवर्जने यदंगंहूयते
नैवकंटकेनापिविध्यते एकस्यप्राणिकान्त्यर्थैरन्यःप्राणैर्वियुज्यते अहोमांसस्यदौरात्म्यंप्रत्य
क्षमपिदृश्यते आत्मौपम्येनभूतेषुसमंपश्यतियस्सदा सुखंवायदिवादुःखंसयातिपरमांगतिं
उद्वेजयतियोरण्येप्राणिनोदुःखजीविनः उद्विग्नवासंवसतियत्रयत्रापिजायते नरकेषुविपच्यंति
नराःप्राणिविहिंसकाः उद्वीजनीयाभूतानांयथाव्यालाभवंतिते यावंतिपशुरोमाणितावंत्कृत्वा
त्वेमारणं वृथापशुघ्नःप्राप्नोतिप्रेत्यजन्मनिजन्मनि हंताचैवानुमंतश्चविक्रेताक्रयविक्रयी

बलगंछ
८० तिनार
कर

संस्कर्ता चोपहर्ता च खादकश्चाष्ट घातकाः धनेन क्रयिको हंति खादकश्चोपभोगतः घातको व
ध धबंधाभ्यामित्येष त्रिविधो वधः स्वमांसं परमांसेन यो वर्धयितुमिच्छति नारदः प्राह धर्मात्मा नरके स विपद्य
ते [illegible] मांसस्य वधबंधौ [illegible] देहिनां प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् यदापि [illegible] ॥ [illegible] ॥
[illegible] तस्यैव चोदरस्यार्थे कः कुर्यात् [illegible] ऋषीणामत्र संवादो बभूव बहुधा पुरा [illegible] चापि तच्छृणुष्व
[redacted] समुत्पत्तिं च मांसस्य वधबंधौ च देहिनां प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् यदापि व
न जातेन शाकेनापि प्रवर्तते तस्यैव चोदरस्यार्थे कः कुर्यात्समंजसं ऋषीणामत्र संवादो बभूव बहुधा पुरा तेषां च
निश्चितं चापि तच्छृणुष्व नराधिप यो हिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया कृष्णद्वैपायनः प्राह स्यावरत्वं स गच्छ
ति संतप्यति तपो जप्त्वा यजती च ददाति च मधुमांसानिवृत्तो यः प्रोवाचेदं बृहस्पतिः यावज्जीवं न यो मांसं विषवत्परिव
र्जयेत् वसिष्ठो भगवानाह स्वर्गलोकं स गच्छति यो भक्षयित्वा मांसानि पश्चादपि निवर्तते जमदग्निर्जगादेवं।

त्य

८२ सोपि स्वर्गमवाप्नुयात् रूपमारोग्यमैश्वर्यं कीर्त्तिं स्वर्गतिमेव च प्राप्नोतिहिंसापुरुषः प्राहैवमुपानामुनिः सुवर्णदाना
द्गोदानाद्भूमिदानात्तथैव च उत्तमं प्राणदानं स्यादित्युवाच पराशरः एष धर्मः समाख्यातो मार्कण्डेयेन पार्थिव मनु
नापि च यत्प्रोक्तं तदिदानीं ब्रवीमि ते कर्मणा मनसा वाचा यो हि नस्ति न किंचन तान्मित्रं सर्वभूतानां मनुः स्वाय
भुवोब्रवीत् मधुमांसं च यो नित्यं वर्जयेन्नीह मानवः जन्मप्रभृति मत्स्यांश्च सर्वे ते मुनयः स्मृताः गोमूत्रयावका
हारो यस्तिष्ठेत् क्रूरदंशतं नभक्षयेच्च यो मांसं नन्मांदस्तयोवरः बधबन्धपरिक्लेशं प्राणिनां न करोति यः स सर्वस्य हि
तश्रेप्सुः सुखमोक्षयमश्नुते भेरीशंखमृदंगानां वल्लकीनां च निस्वनं निषेविष्यति वैमर्त्यो मांसभक्ष्याकथं नरः । पुरषोमांस
यस्तु वर्षशतं साग्रं तपस्तेपे सुदारुणं नभक्षयति यो मांसं सममेतन्दुदाहृतं यस्तु वर्जयते मांसं मांसलुब्धः पदेपीसो मनकाद्
पिस्वर्गमवाप्नोति किमुतात्यन्तवर्जनात् मद्यं मांसं त्वियो चूतं स्तेयप्राणिनिपातनं तस्यादेवापरस्पष्टं स्वविनाशप्रापक्षि क्षिपदेपदे
दे॰ व॰ २ तं स्यच नं कासविज्ञानशिरः खड्गेन पातयेत् इष्टामतिं योजयति व्यसनेष्वेषु पातकं यथा हस्तिपदे न्यास्ति पदा
निपदगामिनां सर्वे धर्मास्तथा राजन्नपिधीयन्ते ह्यहिंसया तिर्यग्योनिसहस्रेषु प्राप्य जन्मशतेपुनः अंत्यजातिषु
जायंते पुरुषः प्राणहिंसकाः वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः न खादति च यो मांसं तयोः पुण्यफलं समं ॥ ८२

मे

समुद्रसागरपर्यंतांयोदद्यात्पृथिवीमिमां नत्वादेश्चैवयोमांसंत्तयो।गुणपर्कलंसमं यद्यच्छितियजेकार्यंदृष्टापमपि
मानवः तत्तत्प्राप्नोतियत्नेनयोहिनस्तिनकिंचन कामगेनविमानेनदिव्यस्त्रीशतसेवितः देववन्मोदतेस्वर्गेनरो
मांसविवर्जनात् ध्यानयोगरतानित्यंयांगतिंयांतियोगिनः तामेवगतिमाप्नोतिसर्वसत्वदयापरः आत्माविष्णु
समस्तानांवासुदेवोजगत्पतिः तस्मात्सर्वैस्सर्वैःकार्यापरहिंसाविशेषतः सर्वभूतहितंधर्ममेदयांतिष्ठतस्सदा सततेद्वि
ब्रह्मभूतस्यविप्रस्यस्पृहायंतिदिवौकसः सर्ववेदाधिगमनंसर्वतीर्थावगाहनं सर्वयज्ञफलंचैवनैवतुल्यम
हिंसया अहिंसापरमोधर्मोस्तथाहिंसापरंतपः अहिंसापरमंदानमहिंसापरमंदमः अहिंसापरमोयज्ञस्तथा
हिंसापरंसुखं अहिंसस्यतपोक्षय्यमहिंसोयजतेसदा अहिंसासर्वभूतानांयथामाताःयथापिता जीवि
तानिपरित्यज्यवहवस्सापवोजनाः स्वमांसैःपरमांसानिपरिपाल्यदिवंगताः उत्तमादुत्तमंधर्ममहिंसालक्ष
णंशुभं येचरंतिमहात्मानोविष्णुलोकंव्रजंतिते एतदाख्यापनंविष्णोर्लमुद्दिश्यचरंतियेतेयांतिविष्णु
सायुज्यंतपसैनात्रसंशयः एतत्तेकथितंकिंचिदहिंसागुणलक्षणं समस्तानिनशक्यंतेवक्तुंवर्षशतैरपि

उ॰हु॰ धर्माख्यानमिदं पुण्यं सर्वभूतहितावहं यः पठेच्छृणुयाद्वापि स गच्छेत्परमां गतिम् नमांसमश्नात्पुरुषार्थेना
८२ शनं कृपायाः परमञ्ज्ञः परमेतितुष्टतिं नजीवदानात्परमास्तिपावनं तथा च हिंसाद्विमुखाविपश्चितः॥ ॥
इतिहाससमुच्चये मांसभक्षणनिषेधो नामाष्टाविंशोध्यायः २८ जनमेजय उवाच कथं नागायुतप्राणो भी
मो भीमपराक्रमः जगाम सर्पस्य वशं तन्मे ब्रूहि तपोधन वैशंपायन उवाच यदृच्छया कदाचित्स खड्ग
पाणिधनुर्धरः चचार मृगयामेको वने तस्मिन्वृकोदरः १ स शैलशिखराकारं कस्मिंश्चिद्गिरिकंदरे द २
दर्शाजगरं ग्राहं मूर्तिमंतमिवांतकं २ स तं भीमं समभ्येत्य भुजगेंद्र विनोदितः वेष्टयामास कायेन निश्चेष्टमकरो
द्बली ३ एतस्मिन्नेव काले तु धर्मराजस्य धीमतः घोररूपा महोत्पाताः समुत्तस्थुः समंततः ४ तान्दृष्ट्वा स
महोत्पातान्नृपतिर्नान्मयैंहिनः भ्रातॄन्विलोकयामास न चापश्यद्वृकोदरं ५ ततोर्जुनं समादिश्य द्रौपद्यारक्षणं प्रति
नकुलं सहदेवं च संश्रुतस्य युधिष्ठिरः ६ स तस्य जंघापवनं भग्नपादस्य लक्षणं मार्गं जगाम वेगेन धौम्येन सहित
स्तथा गत्वा तु राजा राजेंद्रो ददर्श गिरिकंदरे भ्रातरं भुजगेंद्रेण महता परिवेष्टितं ततः सशोकदुःखार्तो भीमं पप्रच्छ पां

श्रीः ८२

उवः कथमेतत्त्वयाप्राप्तंकोवायंभुजगोत्तमः ९ एवंदुःखपरीतेनभ्रात्राहृष्टोवृकोदरः यथावत्तस्यतत्सर्वकथया
मासचेष्टितं १० तच्छ्रुत्वाभीमसेनस्यमोतमिच्छन्नराधिपः पप्रच्छाजगरंराजंस्तेकौन्तेयस्समन्वितः ।। युधिष्ठिरउवाच
देवोवामानुषोवापिकस्त्वंकथयपन्नग किमर्थंवागृहीतस्तेभ्रातायंभुजगोमम १२ पन्नगउवाच नहुषोनामराजा
हंसर्वेषांपर्वजस्तव प्रथितःपंचमस्सोमादायोर्वंशकरस्सुतः तपोभिःक्रतुभिश्चैव विद्ययाभोजनेनच त्रैलोक्यै
श्वर्यमव्यग्रंप्राप्तंमेविक्रमेणच १४ ऐश्वर्यात्सर्वलोकानांदर्पोमांसमुपाविशत् सहस्रंमुनिमुख्यानांमुवाहशिबिं
कांमम दर्पलोभात्कुपितोराजन्मङ्गोषेनगरीयसा अगस्त्योलोकविख्यातःप्रदीप्तइवपावकः १६ तेनविप्रेणशि
नःस्थाहमगस्त्येनमहात्मना ईदृशींप्रापितोवस्थांपश्यदेवविधेर्बलम् नदेवंपन्नयात्तानतबलोत्साहपौ
रुषैः नस्तहं मैवलेवीपिकश्चिदप्यतिवर्तते १७ नदेवस्यातिभारोस्तिसर्वदुःखोपपादने यदहंदेवरा
जत्वात्स्थानोरगतांगतः यदिप्रज्ञाचशौर्यंचसंपदःकारणंभवेत् प्रज्ञावतांचशूराणांनकदाचिद्धिसंपदः
प्रज्ञावन्तश्चशूराश्चदृश्यंतेदुःखजीविनः भीरुर्मूर्खश्चसखिनस्तस्माद्दैवोत्रकारणं यत्किंचिदिहभूतिस्या
द्विपत्तिर्वाप्यचिंतिता महून्तेनेवतद्दैवमुपपादयतेनृणाम् २१ पतिताचविमानाग्रान्मयासमुनिस

गतोगतमविप्रापः सर्वेषांप्रथितेनमयाह

ग्रे

रुद्रा
८३

त्तमः उक्तः शापांतमित्युक्तः प्रोवाचेदं दयान्वितः यस्तु ते व्याहृतान्प्रश्नान्प्रतिवक्ष्यति धर्मवित् स त्वां मोक्षयिता
शापात्कस्मिंश्चित्कालपर्यये नचतेमत्प्रमादेनस्मृतिर्भ्रंशो भविष्यति बलमप्यपरिक्षीणंभुजगत्वेपिपूर्ववत्
२४ बलवानपिजंतुस्त्वंगृहीतोवशमेष्यति इत्येवंवदतस्तस्य महर्षेर्भावितात्मनः स्त्राकाशात्पतितोनृ
मो भुजगत्वमुपागतः यदिहिव्याहृतान्प्रश्नान्मयाकथयसेनृप २६ ततो भ्रातरमेनं ते मोक्षयिष्येनचा
न्यथा युधिष्ठिरउवाच वदतातयथाकामंत्वंप्रसान्[blot]विरं कथाः २७ यथाज्ञानमहं तातेकथयिष्या घ ह
मिशक्तितः नहुषउवाच धर्मस्सर्वत्रशंसंतिदेवाब्राह्मणर्षयस्तथा तस्मात्समासतोधर्मंकथयस्वममानघ
युधिष्ठिरउवाच सत्यंदमस्तपःशौचंसंतोषोह्रीःक्षमार्जवं ज्ञानंशमोदयाध्यानमेषधर्मःसनातनः नहुष
उवाच किंसत्यंप्रोच्यतेराजन्कोदमस्तपकीर्तितः ३० तपःकिंलक्षणंप्रोक्तंकिंशौचमुदाहृतं युधि
ष्ठिरउवाच सत्यंभूतहितंप्रोक्तंमनसोदमनंदमः तपःस्वधर्मवर्तित्वंशौचंशंकरवर्जितं नहुषउवाच सं
तोषःकीदृशःप्रोक्तःकाचह्रीःपरिकीर्तिता ३२ क्षमाचकापराप्रोक्ताकिंचार्जवमुदाहृतम् युधिष्ठिरउवा
च संतोषोविषयत्यागोह्रीरकार्यनिवर्तनं ३३ क्षमाद्वंद्वसहिष्णुत्वमार्जवंसमचित्तता नहुषउवाच ॥ ८३

नि

नहुषउवाच किंस्नानंप्रोच्यतेराजन्कश्चमापरकीर्तितः दयाचकापराप्रोक्ता किंचध्यानमुदाहृतं ३४ युधिष्ठिर
उवाच स्नानंतत्वार्थसंबोधः शमश्चित्तप्रशांतता दयासर्वसुखैषित्वंध्यानंनिर्विषयेमनः ३५ नहुषउवाच
कश्चशत्रुर्दुर्जयःपुंसांकश्चव्याधिरनंतकः कीदृशश्चस्मृतःसाधुरसाधुःकीदृशःस्मृतः ३६ युधिष्ठिरउवा
च क्रोधःसुदुर्जयशत्रुर्लोभोव्याधिरनंतकः सर्वभूतहितःसाधुरसाधुर्निर्दयःस्मृतः ३७ नहुषउवाच को
न मोहःप्रोच्यतेराजन्कश्चमानःप्रकीर्तितः किमालस्यंचविज्ञेयंकश्चशोकःप्रचोच्यते ३८ युधिष्ठिरउवाच
मोहोहिधर्ममूढत्वंमानस्त्वात्माभिमानता धर्मनिष्क्रियतालस्यंशोकस्त्वज्ञानमुच्यते ३९ नहुषउवाच।
किंस्थैर्यमृषिभिःप्रोक्तंकिंधैर्यमुदाहृतं स्नानंचकिंपरंप्रोक्तंकिंचदानमिहोच्यते ४० युधिष्ठिरउवाच॥
स्वधर्मेस्थिरतास्थैर्यंधैर्यमिंद्रियनिग्रहः स्नानंमनोमलत्यागोदानंत्वभयदक्षिणा ४१ नहुषउवाच का।
पंडितःपुमान्ज्ञेयःकश्चमूर्खोजनेश्वरः संसारहेतुःकश्चस्याद्धृत्तापःकःपरस्मृतः ४२ युधिष्ठिरउवाच।
धर्मात्मापंडितोज्ञेयोनास्तिकोमूर्खउच्यते कामस्संसारहेतुश्चहृत्तापोमत्सरःस्मृतः ४३ नहुषउवाच को
हंकारइतिप्रोक्तःकश्चदंभःप्रकीर्तितः असूयाचकाज्ञेयाकिंतत्पैशुन्यमुच्यते ४४ युधिष्ठिरउवाच॥ ८

श्रीनंदगोविंदमुकुंदरामनारायणानंतहरेप्रमेय नरसिंह प्रियनंदतनयविष्णोमुरारेसरसीरुहाक्ष

नो
मोहेस्तानमहंकारोदंबोधर्मध्वजो स्त्रियः गुणदोषोभ्यसूयापैशुन्यंपरदूषणं ४५ नहुषउवाच धर्म
८५ स्यार्थकामस्य परस्परविरोधिनः एषांनित्यविरोधिनां कथंस्यात्संगमःसदा ४६ युधिष्ठिरउवाच य
दागतौचभार्याच परस्परवशानुगौ तदाधर्मार्थकामानां त्रयाणामपिसंगमः ४७ नहुषउवाच अक्ष
योनरकाःकेन प्राप्यतेभरतर्षभ एतन्मेपृच्छतःप्रश्नंयथावद्वक्तुमर्हसि ४८ युधिष्ठिरउवाच ब्राह्मणं
स्वयमाहूयेयाचमानमकिंचनं पश्चान्नास्तीतियोब्रूयात्सोक्षयंनरकंव्रजेत् ४९ वदिष्टश्चैवयस्तुवेद
स्तंवह्निमानवः स्नेहेनलोभमोहाभ्यांसोक्षयंनरकंव्रजेत् ५० अध्वश्रांतमविज्ञातमतिथिंक्षुत्पिपासि
तं योनसत्कारयेत्भक्त्यासोक्षयंनरकंव्रजेत् ५१ संश्रितंचापियस्त्यक्त्वाबान्धवंहृत्किल्बिषं परद्रव्यरतोमू
ढःसोक्षयंनरकंव्रजेत् ५२ देवनिंदापरश्चैववेदनिंदारतस्तथा पतिनिंदापरश्चैवसोक्षयंनरकंव्रजेत् ५३
छिद्रान्वेषीचयोनित्यंपरेषांक्रूरमानसः परेषांत्साहयोगेनसोक्षयंनरकंव्रजेत् ५४ (देवनिंदापरश्चैववे
ब्रह्मण दर्निदारतस्तथा) विश्वंदेवेशंपुराणंपुरुषोत्तमं लोकनाथमनाद्यंतंजगतःकारणंपरं ५५ नचा
र्चयंतियेमूढाःपरमात्मानमव्ययं तेयांतिपरमंघोरंमक्षयंनरकंनरा ५६ विद्यमानेधनेलोकेदानद्र ८६
नो
छिद्रान्वेषीचयोनित्यंपरेषांमूढमानसः परेषांत्सोहयोगेनसोक्षयंनरकंव्रजेत्

मीदिवर्जितः लुब्धपुरुषशार्दूलसोत्वयंनरकंव्रजेत् ५७ विद्यमानेधनेयस्तुप्रतिग्रहरतिर्द्विजः नरकंरौरवं
प्राप्यतत्रैवपरिपच्यते पिशुनोयस्तुलोकानांरंध्रान्वेषणतत्परः तंदृष्ट्वापुरुषव्याघ्रसचेलंस्नानमाचरेत् ५८
नीचाभिगमनेसक्तायानारीपुरुषर्षभ प्रतिकूलातथाभर्तुस्सोत्वयंनरकंव्रजेत् अहूतस्यापिशयनेयास्त्रीसौभा
गर्वितास्त्रि ग्यावर्जिता भर्तुस्स्वकाशंनायातिसोत्वयंनरकंव्रजेत् ६१ अतिथिंकालसंप्राप्तमभ्यागतमथापिवा अवमानप
रायाचसोत्वयंनरकंव्रजेत् ६२ एतत्तेसर्वमाख्यातंमयातत्त्वेनपार्थिव अन्यथानरकोयेनकर्मणाप्राप्यतेनरैः।
६३ इतिनरकगमनं अथस्वर्गगमनं नहुषउवाच अथस्वर्गमाप्नोतिकर्मणायेनमानवः सर्वमेतत्त्वमहंम
न्येतद्वदस्वममानघ युधिष्ठिरउवाच यज्ञोहोमजपस्नानदेवतार्चनतत्परः नित्यदानरतश्चैवसोत्वयंस्वर्ग
न् मश्नुते दोषांश्चिहायराजेंद्रगुणान्वेषणतत्परः परेषांसततंयस्तुसोत्वयंस्वर्गमश्नुते ६६ गृहेयस्यागतोविद्वा
न्निराशोनैवगच्छति ब्राह्मणोनरशार्दूलसोत्वयंस्वर्गमश्नुते ६७ याचितोयस्तुद्रव्येनदत्वाचप्रियवाग्भवेत्
तंदृष्ट्वाप्ययस्समात्मासोत्वयंस्वर्गमश्नुते ६८ गच्छतःतिष्ठतोवापिजाग्रतःस्वपतोपिवा मनःपरहितेयस्य

उ॰ प॰ सोक्षयंस्वर्गमश्नुते ६९ विक्रोनिक्रोहृषीकेशपरोभक्तिमुपागतः आकार्यविनिवृत्तो यः सोक्षयंस्वर्गमश्नु
८५ ते ७० पतिरत्तानुपानारीमनोवाक्कायकर्मभिः भर्तुः शुश्रूषणपरा सोक्षयंस्वर्गमश्नुते ७१ यौवनेस
तिरागेंद्रियेद्रव्येतथैवच योवैजितेंद्रियोधीरः स्वर्गमश्नुते शूद्रोद्विजातिवर्णेषु शुश्रूषाभिरतस्वयः कर्मणा
मनसावाचा सोक्षयंस्वर्गमश्नुते ७३ एतत्तेसर्वमाख्यातंमयातत्वेनपार्थिव प्राप्यतेवाकर्मणायेनस्वर्गवासंत
यस्तवै ७४ नहुषउवाच कथंसत्यमहावाहोयः कालः श्राद्धदानयोः यत्नेनमहीवीत्वयप्रश्नःकथयमसुव्रत ना
७५ युधिष्ठिरउवाच यत्रैवब्राह्मणंपश्येच्छ्रोत्रियंनियतेंद्रियं रागद्वेषविनिर्मुक्तं वेश्मवंवीतकल्मषं येनकेन
विदाक्षन्नयत्रतत्रनिवासिन एतंकालमहंमन्येपरमंश्राद्धदानयोः ७७ नहुषउवाच जात्याकुलेनवृत्तेनसा
ध्यायेनश्रुतेनच ब्राह्मणंकेनभवतितन्मेब्रूहिसुनिश्चितं ७८ युधिष्ठिरउवाच नजातिर्नकुलंतातनस्वाध्यायो
नचश्रुतं कारणानिद्विजत्वस्यवृत्तमेवातुकारणं अनेकेमुनयस्ताततिर्यग्योनिषुसंभवाः स्वधर्मचारनिरताब्रह्मलो
कमितोगताः बहुनाकिमधीतेनश्रुतेनेवदुरात्मनः तेनाधीतंश्रुतंतेन योवृत्तमनुतिष्ठति कपालस्थंयथातोयंश्वदृत
तेचयथापयः दुष्टंस्यात्स्थानदोषेणवृत्तहीनंतथाश्रुतं वृत्तंयत्नेनसंरक्ष्येद्वित्तमेतिचयातिच अक्षीणोवित्ततःक्षी ८५

लोवृत्तेन सुहृतो हतः किंकुलेनोपदिष्टेन विपुलेन दुरात्मना क्रिमयाः किं न जायंते उत्तमे पुष्पगंधिषु ८४ पारा
कः पारकश्चैव ये चान्ये शास्त्रचिंतकाः सर्वव्यसनिनो जंतुः क्रियावान्स पंडितः तस्माद्विद्धि महाराज वृत्तं ब्राह्मण
लक्षणं चतुर्वेदोपि दुर्वृत्तः शूद्रात्पापतरः स्मृतः योग्निहोत्रपरो दांतः संतोषनिरतः शुचिः तपःस्वाध्यायशील
श्च तं देवा ब्राह्मणं विदुः येन केचिदाच्छिन्नो येन केन चिदाशितः यत्र कुत्रशयानश्च तं देवा ब्राह्मणं विदुः यस्य नारायणे
भक्तिर्यस्मिन्नेते च सद्गुणाः स दुर्लभो नरो लोके पुरुषो नात्र संशयः सर्वद्वंद्वसहो धीरः सर्वसंगविवर्जितः सर्वस्य
न हितो मैत्रस्तं देवा ब्राह्मणं विदुः मोहैश्च विगुणाद्भीतः सन्मानामरणादिव उरगादिव यस्त्रीभ्यस्तं देवा ब्राह्म
णं विदुः ८१ सत्यं दमः तपो दानमहिंसेंद्रियनिग्रहः दृश्यंते यत्र राजेंद्र स ब्राह्मण इति स्मृतः शूद्रश्चेद्दैवमभवे
त्तं ब्राह्मण्येन च विद्यते शूद्रोपि ब्राह्मणो ज्ञेयो ब्राह्मणः शूद्र एव सः ८२ कामक्रोधानृतद्रोहलोभमोहमदादयः ।
न संति यस्मिन्राजेंद्र तं देवा ब्राह्मणं विदुः ८३ न जातिः कारणं तात गुणाः कल्याणहेतवः वृत्तस्थोपि चंडालः
सोपि स्वर्गं निमानुयात् अदेवं दैवतं कथं वृहं वेचेव यदेवतं शूद्रोपि विप्रो मंतव्यः स ऋ विप्रो विनिष्क्रियो वैवर्ती
ज्ञनयशास्ता ऋषिसंगं संगीतया दिति श्चैव दधीचिं च सिद्धा स्थले किं नु वृत्तयः ८६ ॥

सहृता:

९६ क्षत्रियाणांकुलेजातोविश्वामित्रोमहामुनिः तस्मान्नाध्ययनंनापियजनंविप्रलक्षणं नैकदेकांततोग्राह्यंप
वतीतिविशांपते वृत्तमन्विष्यतांतातरक्ष्योभिःपरिपाल्यते मातिषीदनरव्याघ्रशक्तसेष्वपिपद्यते लोलामध्य
यनंनामवृत्तंवृत्तस्यलक्षणं ९९ अग्निहोत्रश्चवेदश्चराजसानांग्रहेग्रहे दयाशौचंचसत्यंचराजसेभ्योनवि
१० द्यते नहुषउवाच प्रियवचनवादीकिंलभते विमृषितकार्यकरःकिंलभते वहुमित्रकरःकिंलभते यःस्वधर्म
करःकिंलभते १०१ युधिष्ठिरउवाच प्रियावचनवादीप्रियोभवति विमृषितकार्यकरोऽधिकंजयति वहुमित्रक
रःसुखंवसति स्वधर्मरताःसल्लभते १०२ वैशंपायनोवाच श्रुत्वात्तुनहुषःप्रश्नांधर्मराजप्रकीर्तितान् विस्मय
परमापन्नःप्रसन्नात्माब्रवीदिदं नहुषउवाच उक्तास्तेसर्वशास्त्राणप्रश्नाःप्रश्नविदांवर इदानींमेवमुंचामिभ्रा
तरंतेवृकोदरं १०४ वैशंपायनउवाच नहुषेणततोमुक्तोभीमनामाग्निसुसोदरं युधिष्ठिरोपिधर्मात्मानहुषंप्रत्यपू
जयत् १०५ नहुषोपिमुनेःशापाद्विमुक्तःप्रीतमानसः दिव्यरूपधरःश्रीमानब्रवुवाचयुधिष्ठिरं नहुषउवाच ॥
संभाषंसाधुभिःपुण्यमितिसंवर्धतेश्रुतिः सर्पत्वात्प्रमुक्तोहंत्वयासंभाष्यसाधुना धर्मविद्भिर्नराःख्यात्वालभंते
सत्सुतानिह धर्मलवःकृतोधर्मोयेनलब्धोभवान्सुतः नकेवलंप्रजाधन्यायासांधर्मपराभवान ॥ ॥ ८६

धर्मोहिधन्योयमत्रियस्यपुत्रत्वमीदृशः कृताहृष्टास्त्रवहवोनृपाधर्मपरायणाः नमृतोनचमेदृष्टोयमीत्मात्वा
दृशोनृपः ११ युधिष्ठिरउवाच सभाग्योहंमहाराजयस्यतुष्टोभवाग्गुणैः महाभागस्यतुष्यंतिदेवकल्पाभवादृशाः
१२ साधूनांकिंनुसाधुत्वंसद्भूतगुणकीर्तनं गुणीकुर्वंतियेदोषान्साधवस्तेप्यसाधवः किंनुकोन्नहलोकेकिंचिन्म
मपार्थिवसत्तमः अतःपृच्छामिसौहार्दात्त्वामहंनाभ्यसूयया सर्वशास्त्रार्थतत्त्वज्ञंत्रैलोक्यैश्वर्यपूजितं कथंत्वा
माविशन्मोहःप्राकृतंपुरुषंयथा १४ नहुषःउवाच कृतशीलादिभिर्युक्तंधार्मिकंतपसिस्थितं सर्वज्ञमम
वोनेयश्वरद्धिर्मोहयतेनरं १५ हीनाभिजनवृत्तोपिनसराजास्तिकश्चन यस्यचेतसिराजेंद्रनकरोतिमदःपदं।
१६ दुर्जयःसहजःशत्रुर्मदोराज्ञांसुदारुणः तेनाभिभूतानृपतेराज्यान्स्वर्गाच्चपार्थिव १७ राजस्यायदि
राजानःस्वधर्मंउपयाचताः ततःस्वर्गाच्च्योर्तविनान्यांतेगतिमाप्नुयुः एकेनान्रुतपोधर्ममधर्मंवाकरो
तिच बहुनापिनकालेननकरोतीतराजनः १९ यथाग्नेःप्रभवत्युत्सत्त्वमनिलेचनलं तथा यथाशशिनिशी
तत्वंनयेश्चर्यमिवामरः वारुणीपानमत्तस्तुह्यपितिष्ठेवबुध्यति ऐश्वर्यमदमत्तस्तुनापतित्वेवबुध्यते २१ ॥
ऐश्वर्यतिमिरंचक्षुर्नन्यपश्यतिनिर्मलम् पश्चाद्विमलतांयातिविनिपातांजनांचितं २२ सोहमैश्वर्यति

८७ शिरोमर्दोपीकृतलोचनः पतितः प्रतिसंबुद्धः सांप्रतं कोपमत्तया २५ लोकद्वयहितं वक्तुं त्वत्तस्तु वा कोन पंडि
तः नक्रियानुविधाने तु गुनयोपि न पंडिताः पंडितोपि सुशूरोपि सुसहायोपि पार्थिवः मदेन ग्रस्यते वश्यं राहु
णेव दिवाकरः तस्माल्लोकद्वयध्वंसी न कार्यो भवतः प्रत्यक्षमेन दृष्टं ते यत्प्राप्तं श्रीमदान्मया २६ द्विजाश्च ना
वमंतव्या हि त्रैलोक्यैश्वर्यपूजिताः देववत्पूजनीयाश्च दानमानार्चनादिभिः २७ ये कृताः सर्वभक्ष्याग्निरपेय
श्च महोदधिः क्षयी चाप्यायितश्चंद्रः ब्राह्मणैर्देवपितरः २८ किंभूतमधिकं ततः ये सृजिताः सुरैः सर्वैर्म
नुष्येष्वेव भारत २९ तपोहृत्रपनायेच वाक्तां जगति नार्चयेत् पूर्वं पीतः समुद्रो यैर्विन्ध्यो वृत्त्वं निवारितं
३० येषामपि देवताः सृष्टाः कोन्यास्तज्यनमस्ततः वाक्शस्त्रा वाग्विषा राजन् वागग्निरयि कोपिताः ३१ नो
पितास्तीर्थभूताश्च सर्वपापहरा यतः यामेव देवतामिच्छेदाराधयितुमव्ययां सर्वोपायैः प्रयत्नेन संतोषय
त्वैव द्विजान् कृतांतपाशबंधानां देवोपहतचेतसां ३३ बुद्धयः उज्जगामिन्यो भवंति महतामपि सविद्वानपि
वीरोपि सर्वशास्त्रार्थतत्त्ववित् ३४ कृतांतवशमापन्नो न जानेहं किं करोम्यहं (यस्माच्च येन च यदा च यथा च यच्च ८७

ताव्[?]स्तत्र च कृतां तु वशाद्रपैति यथा च देवदेवेन विष्णुना प्रभविष्णुना उक्तं यादवमध्ये तु द्वारकायां पुरा न च
दृष्टं तं प्राप्तं तेपरुषवदंतं यो ब्राह्मणेन प्रणमेरायाहं सपापः कृच्छ्रस्थः वाग्निदग्धो वध्यश्च दग्धश्च न चास्मादीयः
पश्चमो वरया भक्त्या त्वाराधयितुमिच्छति तेन विप्राः सदा पूज्याः सम्यक् तुष्टो भवाम्यहं वैशंपायन उवाच ए
वमुक्त्वा स नहुषो धर्मपुत्रं दिविं गतः युधिष्ठिरो भीमेन सहितः स्वाश्रमं ययौ ३९ तत्र गत्वा यथावृत्तं वृत्तांतं त
प्रसन्नमः मुनीनां कथयामास यमयोरर्जुनस्य च ४० एतच्चैव कथितं राजन् यथा भीमो महाबलः अरण्ये जगर
ग्रस्तो धर्मराज्ञेन मोक्षितः ४१ एतां धर्मान्विशेषेण कृत्वा पांडववनेऽवनात् नहुषः प्राप्तवान् सद्यो ब्रह्मलोकं सना
तनं ४२ य इदं शृणुयान्नित्यं नहुषाख्यानमुत्तमं श्रावयेद्वा द्विजातिभ्यो विष्णुलोकं स गच्छति ४३
इतिहाससमुच्चये नहुषयुधिष्ठिरसंवादो नामैकोनत्रिंशोध्यायः २९ युधिष्ठिर उवाच शरतल्पगतं भीष्मं
वृद्धं कुरुपितामहं मूर्ध्ना प्रणम्य धर्मात्मा पप्रच्छेदं युधिष्ठिरः युधिष्ठिर उवाच १ भगवन् श्रोतुमिच्छामि सत्यव्रता
कामन्तुत्तमं यन्माग बहुल्याप्रोक्तं तन्मे व्याख्यातुमर्हसि २ भीष्म उवाच सोम्य धर्मं प्रवक्ष्यामि सत्यार्जवगुणान्वि
तं व्याघ्रस्य कामदूपस्य येन्वासंवादमुत्तमं ३ माथुरे विषये रम्ये धनधान्यसमाकुले नानाजनपदाकीर्णे

ह०मा० त्रोत्सवविभूषिते तत्रस्नानगरी रम्या यमुनातीरमाश्रिता अर्धचंद्रप्रतीकाशा विधज्ञानविभूषिता ५ इंद्रिय
ध्वजाकीर्णगोपीभिरुपशोभिता बहुद्विजसमाकीर्णविहंगारम्यविश्रया ६ हम्र्यमाणगृहरम्या च स्थानिनत्र
८८ शोभिता प्राकाराट्टालवेदीभिर्दुर्जयापरिखादिभिः देवत्तायत्तनैर्दिव्यैः कदलीषंडमंडिता राजहंसप्रतीका
शैरीष्पतेर्धवलैर्गृहैः परमैर्वकुलैस्तीलैः तमालैर्नारिकेलकैः आम्रैराम्रातकैर्वापि निंबैश्च राजवृक्षैः सुशोभि
ता ९ मल्लिकाकुंदजातीभिः पद्मोत्पलकुरंडकैः सुवर्णयूथिकाभिः किंकिरातैः सकुब्जकैः १० करवीरैः
ग कर्णिकारैश्च पाटलाशोकचंपकैः पुन्नागनागकेसरैः करुघानेरुपशोभिता ११ संपूर्णाधनधान्येन गोधनेस्स
मन्विता रावणस्येव रत्नाढ्या यथा लंकामहापुरी १२ चंद्रसेनोनृपायत्र सर्वैस्समन्वितः धर्मिष्ठनिरतो
नित्यं देवतातिथिपूजकः १३ स्वधर्मरतः श्रीमान्प्रजापतिसमः स्थितो तेनस्यानगरी रम्या राजसिंहेनपालि
ता नित्योत्सवप्रमुदिता वंशवादित्रनिःस्वना ससंगीतविदग्धेश्च प्रेक्षणैश्च समाकुला १५ अनरावनेवी
थिभिः सविभक्तचतुष्पथा दीर्घिकाकूपवापीनिस्तडागैश्चोपशोभिता १६ सभामठसमाकीर्णा विवा ८८

होत्सवसंकुला हृष्टपुष्टसर्वेशोभनरनारीजनैर्वृता ७ पुरीचंद्रावतीनामकृष्टस्वायदिवाशुभं ते
सांपुर्यां पुरावृत्तं यत्तच्छृणु युधिष्टिर तस्यांचिद्द्विजस्यासीत्सवत्स्यागोधेनुरुत्तमा हृष्टापुष्टासुपुत्रा
चबहुक्षीरानामनामतः १९ गोमंडलस्यमुख्यासा हंसवर्णा घटस्तना दीर्घशृंगाविभक्तांगी खुरी प
गीतनुत्वचा २० विस्तीर्णजघना दिव्यापीनोन्नतपयोधरा सर्वलक्षणसंपूर्णासर्वावयवसुंदरी नील
कंठीसुभग्रीवाघंटालीमधुरस्वना साचसूर्यस्यसर्वस्यचचारागोसुनिर्भया २२ वनांतम्गिरेर्दूरतंगा
ते केवपथासुखं सोद्वेप्रकामेसुरभिविछिन्नेचर्वनीतृणं रोहितोनामतत्रास्तिपूर्वतोयमुनात
टे अनेककंदरदरीगुहानिर्झरशोभितः २४ तस्यपूर्वोत्तरेभागेघोरवृक्षसमाकुले संकटेविषमे
दुर्गेभैरवेरोमहर्षणे २५ मृगसिंहसमाकीर्णेबहुश्वापदसेविते वल्लीवृक्षादिगहनेशिवाशतनि
नादिते २६ दुर्गेस्मिन्वसतेरौद्रःकामरूपीतिनामतः व्याघ्रो शोणितमांसाशोमहादंष्ट्रोमहाबलः
२७ महापर्वतसंकाशोमेघगर्जितनिस्वनः महागुहादरीवक्रःतीक्ष्णदंष्ट्रोनखायुधः २८ सोपि

स

८९ लोनामधर्मात्मासगोपोगोहितेरतः अच्छिन्नाभेस्तृणैर्दीर्घैर्गोपनंपर्यरक्षत २९ तस्यस्थानपरिहृष्टा
वत्सलान्तरणात्समया व्याघ्रस्यपुरतःसागौःस्थ रंतीमुपस्थिता ३० अभिद्रवस्तुतांव्याघ्रोतिष्ठतिष्ठेतिचाब्र
वीत्पुनः ३१ व्याघ्रउवाच त्वमद्यविहितोभक्ष्यःस्वयंप्राप्तासिसुव्रते तिष्ठतिष्ठभयंत्यक्त्वाकिंभीताद्यधावसि
व्यसि ३२ भीष्मउवाच व्याघ्रस्यवचनंश्रुत्वानिष्ठुरंरोमहर्षणं ततःसाकंपिताधेनुर्वायुनाकदली
यथा ३३ सुखंवृत्यान्वितंवालंचंद्रबिंबसमप्रभं दृष्ट्वाकामंसुविश्रांतंतस्मायापरिपीडितं ३४ व
त्सोस्मरतिसाधेनुःस्नेहात्सर्वस्यदुःखिता दह्यतेपुत्रशोकेनवत्सलापुत्रवत्सला ३५ रुदंतीकरु
णंदीनानिराशापुत्रदर्शने दृष्ट्वातुवत्सलोव्याघ्रःक्रूरस्मानोतिदुःखितां ३६ उवाचवचनंघोरंव
कुलेकिंपरोद्यसे देवाद्यथोपपन्नासिभक्ष्योमेत्वंयदृच्छया ३७ अरुदंत्यारुदंत्यावादृष्ट्यातेजीवितंम
वेत्र विहितंभुंज्यतेलोकेस्वयंप्राप्तासिधेनुके ३८ मृत्युमेवविहितोह्येववृथाकिंमनुशोचसि ८९
सप्राक्तंचपुनर्व्याघ्रःकिमर्थंरुदितंत्वया ३९ कौतूहलंमेसंजातमशेषंकथयस्वमे व्याघ्रस्यव
९ अद्यतांभक्षयिष्यामिदुर्लभंतवजीवनं निःस्नेहस्यतुधात्रस्यषष्ठेकालेबुभुक्षतः अद्यान्तंतिगमिष्यामिमां

चनंश्रुत्वावहुलावाक्यमब्रवीत् ४० वहुलोवाच त्वंतुमर्हसिमेनाथकामरूपनमोस्तुते त्वांसमासाद्य
लोकस्यपरित्राणंनविद्यते ४१ जीवितार्थेनशोचामिप्राप्तव्यंमरणंमया जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्म
मृतस्यच ४२ तस्मात्परिहार्येर्थेनशोचामिमृगाधिप देवैरपियदाहार्यैर्मनैर्ममवपषेध्रुवं ४३ तस्मान्न
चाहमेवैकाव्याघ्रशोचामिजीवितं किंतुस्नेहवशात्व्याघ्रसुदुःखंरुदितंमया ४४ अस्तिमेहृदसंतापस्तंच
त्वंश्रोतुमर्हसि अग्रेवयसिवर्तंतीप्रसूताहंमृगाधिप ४५ दृष्टःप्रथमजातश्चस्तनपश्चममबालकः स्त्री
रयस्तुचमेपुत्रस्तृणेनाद्यापिखादिति ४६ सचवैगोव्रजेवद्धःक्षुधार्तोमामुपेक्षते इतिमत्वानुशोचामिक
थंजीवतिमेसुतः ४७ तंसेक्ष्यामिस्तनंचाहंपुत्रस्नेहवशंगता पाययित्वानुतंवत्समवलिह्यचमूर्धनि ४८
सखीनामर्पयित्वानुसंदिश्यचहिताहितं पुनःप्रत्यागमिष्यामियथेष्टंभक्षयिष्यसि ४९ नैवाहंनागमि
ष्यामिमहाव्याघ्रनवांतिकं वहुलायावचःश्रुत्वामृगेंद्रःपुनरब्रवीत् व्याघ्रउवाच ५० किंतेपुत्रेणका
र्यंममरण्येकिंनबुध्यसे त्वंसंतिसर्वभूतानिमामानिरीक्ष्यम्रियंतिच ५१ त्वंपुनःकृपयाविष्टापुत्रपुत्रेतिभा

९० घोसे नमंत्रेनतपोदानेनमानातान्यपिनाहृत्तः ५२ प्राप्नुवंतिपरिज्ञातुंभागतंमत्समीपतः कच्चित्त्वंगोकुलंग
त्वागोपीजनसमाकुलं वृषभैनादितंरम्यंवालवत्सविभूषितं भूतलेमर्त्यलोकस्यस्वर्गतुल्यंनसंशयः ५४
नित्यप्रमुदितंरम्यंसर्वदेवैनपूजितं यत्पवित्रंपवित्राणांमंगलानांचमंगलं ५५ यत्तीर्थंसर्वतीर्थानांरम्या
नांरम्यमुत्तमं समस्तगुणसंपन्नमीश्वरायतनंपरं ५६ यत्प्राप्यसर्वसिद्धानांमोमस्वर्गमनुत्तमं गोपीमथा
नशब्देनवालवत्सरवेनच ५७ गवांहुंकारशब्देनयत्रालक्ष्मीर्वेनशपति यत्रवत्सांश्चहुंकारान्करुणा
न्मातृकांत्यया ५८ कुर्वंतिमातरश्चापिस्नेहार्त्ताः पुत्रकांत्यया यत्रगोपैःपालितंसर्वंवाहुयुद्धकृतास्त्र
मैः ५९ प्रगीनन्दनसंलापवदनास्फोटनादितं रंजन्स्त्रैःस्थितैःवत्सैःक्रंदमानैसमंततः ६० सदा
वह्नीजनेगोष्ठेचलद्भिरिवपंकजैः गत्वानिकेतनंरम्यंमातरंभ्रातरंस्वजनं ६१ दृष्ट्वासर्वीजनेभ्यःकथं
प्रत्यागमिष्यसि पंचभूतानिमेभद्रेपिवंतुरुधिरंनव ननिराशानिभूतानिवाक्यमात्रेणकरोम्यहं ६३
वहुलोवाच प्रथमंरक्षवत्साहंमत्गेदुःस्थलुमेवचः दृष्ट्वासर्वीजनंवालंगोपांश्चपरिपालकान् ६४ । ९०

यत्पापं लुब्धकानां तु म्लेच्छानां नागरदायिनं ते ... ज्येष्ठाव ज्ञानुपेक्षकुर्युः पादे हन्यु स्वयं ... ये

न पापेन लिप्यामि यद्यहं नागमे पुनः २ ... तेन पापेन लिप्यामि यद्यहं नागमे पुन ... कथायां वध्यमानायां

स्वभार्यां विघ्नकारकः तेन पापेन० ९

गोपीजनमुपामेवगानं नीचविशेषतः शपथेरागमिष्यामि मन्यसेयदि मुंचमां ६५ यत्पापं ब्रह्महत्यायां मातापितृवधेषु च तेन पापेन लिप्यामि यद्यहं नागमे पुनः ६६ पादैः स्पृशति यो गावः शिरोभिर्न नमेत्तिच तेन पापेन लिप्यामि यद्यहं नागमे पुनः ६७ द्विभार्यः पुरुषो यस्तु द्वेष्टि एकां परित्यजेत् तेन पापेन लिप्यामि यद्यहं नागमे पुनः ६८ यस्तु वालवली वृद्धं विषमे वाहयेत्कथा तेन पापेन लिप्यामि यद्यहं नागमे पुनः ६९ यत्पापं लुब्धकानां च म्लेच्छानां नगरदायिनो तेन पापेन लिप्यामि यद्यहं नागमे पुनः ७० गोष्ठवाटं च ये कुर्युः शपते ताडयन्ति च तेन पापेन लिप्यामि यद्यहं नागमे पुनः ७१ स्वकं दत्वा तु यः कन्यां द्वितीये दातुमिच्छति तेन पापेन लिप्यामि यद्यहं नागमे पुनः ७२ कथायां कथ्यमानायां स्वभार्यं विघ्नकारकः तेन पापेन लिप्यामि यद्यहं नागमे पुनः ७३ गृहे यस्यागतो विप्रान्निराशः प्रतिगच्छति तेन पापेन लिप्यामि यद्यहं नागमे पुनः ७४ यति देव द्विजातीनां वेदानां निंदकश्च यः तेन पापेन लिप्यामि यद्यहं नागमे पुनः ७५ सूतकेषु च यत्पा

९२ व

णंपरद्रव्यापहारिणे तेनपापेनलिप्यामियद्यहंनागमेपुनः ७६ विद्यायान्नुलयापित्रोःशुश्रूषां
नकरोतियः तेनपापेनलिप्यामियद्यहंनागमेपुनः ७७ एकाकीमिष्टमश्नातियःकश्चित्पुरुषो
भुवि तेनपापेनलिप्यामियद्यहंनागमेपुनः ७८ उद्दिष्टःचैवयःसाद्येषुन्नतेभाषतेसदा तेनपा
पेनलिप्यामियद्यहंनागमेपुनः ७९ कोर्मरंचैवभर्तारंयानारीह्यवमन्यते तेनपापेनलिप्यामिय
द्यहंनागमेपुनः ८० निक्षेपंहरतेयस्तुविश्वासेनचमानवः तेनपापेनलिप्यामियद्यहंनागमे
पुनः ८१ वासुदेवंपरित्यज्ययोन्यदेवमुपासते तेनपापेनलिप्यामियद्यहंनागमेपुनः ।
८२ अन्योन्यंसमयंकृत्वाविकुर्वन्तियोंतिमानवः तेनपापेनलिप्यामियद्यहंनागमेपुनः ८३ ।
तुलाकूटंचयःकुर्यात्मस्यकूटमथापिवा तेनपापेनलिप्यामियद्यहंनागमेपुनः ८४ स्त्रव
र्णस्तेयकर्त्तीचकन्याहूषकएवच तेनपापेनलिप्यामियद्यहंनागमेपुनः ८५ इत्येतेपीन
केश्चौरैःकुर्वन्तीशपथंसती व्याघ्रःसंप्रत्ययेलब्धापुनःवचनमब्रवीत् ८६ व्याघ्रउवाच ॥ ९२

संजातः प्रत्ययोऽस्माकं शपथैर्बहुलैस्त्वयि कदाचिन्मन्युसंगत्वान्न द्रोहो वंचितो मया ८७ अद्या
पि केचिद्वदंति शपथैर्नास्ति पातकं प्राणत्यागे समुत्पन्ने श्रद्धानं च न तत्त्वया ८८ लोकेऽस्मिन्ना
स्तिकः कश्चिन्मूर्खो यः पंडितमानिनः भ्रमयिष्यंति नैव बुद्धिं ये त्वाहृतं मृदयया ८९ हेतुपक्षस्थदृष्टां
श्रामयंति ह तैस्तानाहतचेतसां श्रामयंति नराः कूडाः कुमार्गाः कुपथदर्शिनः ९० प्रायः कृताकृतकार्यः मन्य
ते नोपकारेण कार्यार्थी भजते लोकान्न कश्चित्कस्यचित्प्रियः ९१ वत्सः क्षीरक्षयं दृष्ट्वा परित्यज
ति मातरं न ते पश्यामि लोकेऽस्मिन् कृते प्रतिकरोति यः ९२ सर्वस्व हितं ज्ञात्वा र्थसमतिनिरन्या
प्रवर्तते ऋषिदेवासुरैर्नरैः शपथः कार्यसिद्धये कृता परस्परे शर्वेनोच मन्यामहे कथं सत्येनापि श
पेद्यस्तु देवाग्निगुरुसन्निधौ तस्यैव वस्तुनो राजा धर्मस्यार्थे निकृंतनंति मा ते बुद्धिर्भवेदेवं शपथै
रेव वंचितः तेनेदं दर्शितं सर्वं यथैतत्कुरुसांप्रतं ९६ वद्रलोऽउवाच एवमेव महाव्याघ्र कस्त्वं वंचयि
तुं क्षमः आत्मैव वंचितस्तेन यः परं वंचयिष्यति ९७ नास्तिमद्भिमिसमं दानं नास्ति धान्यात्समो निधिः
विद्याफलराति सं श्रयेणोप्राणत्यये सर्वेषु नापहारे विप्रस्वचार्थेस्यान्त तेवदंति पंचान्ततान्याहुरपातकानि ४

८२ नास्तिसत्यसमोधर्मो[illegible]नानृतात्परं ९८ अपवादोभवेद्येनयेनवा अन्ययोभवेत् नरकंगम्यतेयेन
तत्कर्मनसमाचरेत् ९९ व्याघ्रउवाच वकुलेगच्छपश्यत्वंपुत्रकंपुत्रवत्सले पाययित्वा[illegible]तंवत्सम
वलिह्यचमूर्धनि १०० मातरंभ्रातरंदृष्ट्वासखीस्वजनबांधवान् सत्यमेवाग्रतःकृत्वाशीघ्रमागमनंकु
रु ॥ भीष्मउवाच एवंसंप्रत्ययंकृत्वावकुलासत्यवादिनी अनुज्ञातानामरगेंद्रेणप्रयातापुत्र
वत्सला १०२ अश्रुकंठीमुखीदीनावेपमानासुदुःखिता करुणीणांमिवार्त्तानोपतितांशोक
न सागरे १०३ करिणीपंकमग्नेवविजनेवगोचरे असन्नात्मपरित्राणेविलपंतीमुहुर्मुहुः १०४ अ
थसागोकुलंगत्वावकुलाहतविक्रमा दृष्ट्वात्मपुत्रंक्रोशंतंप्रययौत्वरितानदा अपसर्पतितंवत्संवा
ष्पव्याकुलितेक्षणे पश्यतिचात्मकंवत्संगोष्ठमध्येसुबद्धकं १०६ क्रममाणस्ततोवत्सोवत्सोमातुः
पार्श्वंसमागतः संप्राप्यमातरंवत्सःशंकितापृच्छतिस्मच १०७ वत्सउवाच शोकार्त्ताहृष्यसेमा
तर्नृशंसंकिमितिदुर्मनाः नतेपश्यामिशोभांत्वंदुःखिनावाष्पलक्ष्यसे १०८ उद्विग्नाचापितेदृष्टि ८२

[illegible]स्य

भीमाचापिचदृश्यते १०९ वह्लोउवाच पितपुत्रस्ततंमेद्यकारणंयदिपृच्छसे आगताहंत्तवहे
हात्करुणंसिंचयेप्सितं ११० अपश्चिममिदंपुत्रदुर्लभंममदर्शिनं स्तनंपिवययेष्टंमेप्रत्यूषेक
सपास्यसि ११२ मयाहिपुत्रगेतस्यशापयेरागताह्यहं कामरूपस्यव्याघ्रस्यदानव्यंचात्मजीवि
तं ११३ वह्लायावचःश्रुत्वावत्सोवचनमब्रवत वत्सउवाच अहंतत्रगमिष्यामियत्रत्वंगंतुमिच्छ
सि ११४ त्वाद्यममापिमरणंत्वयासहनसंशयः एकाकीनापिमर्तव्यमेवाऽवश्यंत्वयाविना ११५
पदिमांमाहितंमातर्वनेव्याघ्रोवधिष्यति मामिनिश्चितंभक्ष्यानोध्रुवंसामेभविष्यति १६ तस्मादव
श्यंयास्यामित्वयासहनसंशयः त्वयाभीतिर्नमेनशपथ्यासंतुतेमम १७ नतत्याविप्रयुक्तस्य
जीवितेकिंप्रयोजनं अनाथस्यवनेनित्यंकोनाथोमेभविष्यति १८ नास्तिमातृसमोवन्धुर्वालानां
क्षीरपायिनां नास्तिमातृसमोनाथोविषमेपर्यवस्थिते १९ नास्तिमातृसमःस्नेहोविकलस्यविशे
षतः नास्तिमातृसमंदैवंमिहलोकेपरत्रच १२० शतंपितॄणांहित्वापिमाताज्ञीवंतिजंतवः

९३ ननु मातृविहीनानां जीवितं ह्युपपद्यते २१ एष नः परमो धर्मो प्रजापतिविनिर्मितः सह गच्छंति ये
मातुस्ते यांति परमां गतिं २२ मासान्दशोदरस्थं या धृत्वा चोल्बेस्समाकुला वेदनैर्विविधैर्दुःखैः
प्रसूयेते विमूर्छिता २३ स्तन्यं चामृतवद्दत्वा संपोषयति वत्सला गृध्रन्त्वमयर्पके माता त्वेहा
द्विवर्षयेत् २४ प्राणैरपि प्रियान्पुत्रान्मन्यंते सुत वत्सलाः कास्तासां निष्कृतिं यातु शक्तो वर्षश
तैरपि २५ वत्सलोवाच ममैष विहितो मृत्युर्न त्वं मां गंतुमर्हसि न चायमन्यजीवानां मृत्युस्था
दृत्यपमृत्युनः २६ अपश्चिममिमं पुत्रमात्रसंदेशमुत्तमं अनुतिष्ठस्व मद्वाक्यं न त्वं शुश्रूषणं परं।
२७ स्थले जले च विचरन्प्रमादं मा करिष्यसि प्रमादात्सर्वभूतानि नश्यंति न च संशयः २८ ॥
न च लोभः प्रकर्तव्यो विषमस्ये तृणे क्वचित् लोभाद्विनाशः सर्वेषामिहलोके परत्र च २९ समु
द्रमटवीं दुर्गं विशंते लोभमोहिताः लोभादकार्यमत्युग्रं विद्वानपि समाचरेत् ३० लोभात्प्रमादाद्वि ९३
श्रंभात्त्रिभिः संक्षीयते जगत् तस्मान्न लोभः कर्तव्यो न प्रमादो न विश्वसेत् ३१ आत्मा हि सततं पुत्र र
प्र

प

क्षितव्यः प्रयत्नतः सर्वेभ्यः श्वादिभ्यश्च म्लेच्छचौरादिसंकटात ३२ निरस्त्राणां पापयोनीनामेकत्रैवस
तामपि विपरीतानि चित्तानि विज्ञायैतेन पुत्रक ३३ नदीनां नाविनां चैव शृंगिणां शस्त्रपाणिनां वि
श्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ३४ न विश्वसेदविश्वस्ते विश्वस्तेपि न विश्वसेत् विश्वासाद्भ
यमुत्पन्नं मूलान्यपि निकृंतति ३५ न विश्वसेत्स्वदेहेपि चलत्वात्स्वार्थचेतसः न बुद्धेर्मूढोऽभ्यर्थेस
तेमन्त्रे प्रसादतः ३६ ज्ञातुर्गंधेन सततमाघ्रातव्यः प्रयत्नतः गावः पश्यंति गंधेन राजानो चारचक्षु
षा ३७ शास्त्रेणार्यं पंडिताः सर्वं ज्ञानेनैव तु योगिनः नैकतिष्ठेद्वने चौरे धर्ममेकं विचिंतयेत् ३८ ।
न चेद्विगन्तव्या कार्यः सर्वत्र मरणं ध्रुवं यथाहि पथिकः कश्चिच्छायामाश्रित्य विश्रमेत् ३९ विश्रम्य
५२ च पुनर्गच्छेत्तद्वत्तु समागमः यत्रानित्ये जगत्सर्वे नित्यैकः शोचसे कथं ४० वत्सत्वं शोकमुत्सृज्य म
हाकायमनुपालय विद्यावृद्धांस्तपोवृद्धान्सेवितार्थी भवमानवान् ४१ न स्यातव्यं न गंतव्यं न वक्तव्यं क
दाचन सर्वथाहितत्यातत्राज्ञि विधेयं निष्प्रयोजनं ४२ एवमाख्यायते पुत्रं मवलिह्य च मस्तकं नि शो

श्रीमउकम

पितॄश्चपतितेनागर्नैज्ञापतेसुनमात्मनः ४

९४ केनमहतनाविष्टावाष्पपर्याकुलेक्षणा ४३ निश्वासंतीचवहुलादीर्घमुष्णंमुहुर्मुहुः पुत्रहीनंजगच्छू
न्यंपश्यंपत्यन्धेवशाभवत् ४४ महार्णवंकनिमग्नेवतिष्ठंतेवावसीदति अपुत्रस्यजगच्छून्यमपुत्रस्य
गृहेनहि ४५ पुत्रेणलोकांजयतिप्रकृतिरेषासनातनी विलप्यवहुधापुत्रमुवाचेदंपुनर्वचः ४६
नास्तिपुत्रसमःस्वर्गोनास्तिपुत्रसमंसुखं नास्तिपुत्रसमाप्रीतिर्नास्तिपुत्रसमागतिः ४७ अन्यत्तंवत्रिलोको
यं चंदनंकिलशीतलं पुत्रगात्रपरिष्वंगस्पर्शनादपिशीतलः ४८ भीष्मउवाच इतिपुत्रगुणानुक्त्वा
सैनिरीक्ष्यसुतंमुहुर्मुहुः त्वमानयेसर्वविगोपयाक्रंदमानानुपृच्छति वहुलोउवाच यथाहृष्टोवनांता
न्मामांसस्वादमृगाधिपः मुक्त्वाहंतेशपथैर्वत्संद्रष्टुंव्रजेतिच ५० साहंभवतीसंद्रष्टुंमातारंस्तनकु
लेहजं आगतःसत्यवाक्येनपुनर्यास्यामितत्रच ५१ मातस्त्वमसस्तनंत्सर्वंवालिवेयत्कृतंपुरा आसो
तवायंरोहितः किंमुनान्यद्ब्रवीम्यहं ५२ विपुलेवंयकेदासेभद्रेस्वरभिमालिनि वृषधारेप्रियेनंदेम
हानंदेचटस्वचे अज्ञानाज्ञानतोवापियत्किंचिदुक्तमप्रियं तत्त्वमर्हंमहाभाग्यायक्षाम्याप्रहते ९४

मया ५४ सर्वाः सर्वगुणोपेताः सर्वलोकस्य मातरः सर्वाः सर्वप्रदा नित्यं रक्षध्वं मम बालकं ५५ अनाथं
विकलं दीनं क्षुधार्त्तं मम पुत्रकं मातृशोकाभिसंतप्तं भगिन्यः पालयिष्यथ ५६ भगिनीनां मया पुत्रः संन्यस्त
श्च विशेषतः बालो बलाढ्यः सर्वाभिः पोष्यः पास्यः स्वपुत्रवत् ५७ चरंतं विषमे स्थाने गच्छंतं परगोकुले
स्वाकर्षिषु प्रवर्त्तंतं संवार्य त्वा वारयिष्यथ ५८ परपुत्रात्मपुत्राभ्यां यासां चित्तं समं भवेत् ना धन्यास्ताः
